# HIGHER SECONDARY COURSE

**KERALA READER** केरलपाठावली

**SANSKRIT** **संस्कृतम्**

Standard - XI एकादशःवर्गः

## OPTIONAL SASTHRA

# उच्चतरविद्यालयानां कृते

# ऐच्छिकम् - शास्त्रम्


**Government of Kerala**

**DEPARTMENT OF EDUCATION**

*State Council of Educational Research and Training (SCERT); Kerala*

**2016**

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्य विधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छल जलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

*Prepared by* :
**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
*Website* : www.scertkerala.gov.in *e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
Typesetting and Layout : SCERT
© Department of Education, Government of Kerala

*To be printed in quality paper - 80gsm map litho (snow-white)*

# प्रास्ताविकम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा इदंप्रथमतया उच्चतरविद्यालयस्तरे पाठपुस्तकानि विरच्यन्ते। परिवर्तितपाठ्यपद्धत्यनुसारमेव एतानि विरचितानि। राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा निर्दिष्टां पाठ्यपद्धतिम् अनुसृत्य राज्यस्तरीयं साहचर्यं च परिचिन्त्य एव पाठभागाः निर्द्धारिताः। एवम् उच्चतरविद्यालयस्तरे प्रथमवर्षे ऐच्छिकविषयत्वेन संस्कृतशास्त्रं पिपठिषूणां विद्यार्थिनां कृते समाकलितमिदं पुस्तकं लघुसिद्धान्तकौमुदीम् (आदितः प्रभृति अजन्तपुल्लिङ्गे इदन्तशब्द प्रक्रियापर्यन्तं भागम्) तर्कसंग्रहञ्चान्तर्भाव्य संपादितम्। पाठ्यांशानां सम्यगवबोधनार्थमावश्यकं लघुव्याख्यानमप्यत्रायोजितम्। पठनोपकारकाणि अभ्यासकार्याणि अभ्यासकार्याणि च कानिचिदेकत्र दत्तानि। अध्यापकैः अभ्यासकार्यान्तराण्यपि यथायथं विरच्यन्ताम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा समायोजितायां तत्तद्विषये प्रवीणानां महाविद्यालयाध्यापकानामन्येषां शिक्षाशास्त्रज्ञानां नेतृत्वे प्रवृत्तायां कर्मशालायामेव पुस्तकस्यास्य संपादनं कृतम्। पुस्तकस्यास्योपयोगिता संवर्धनानुगुणं निर्देशादिकम् अध्यापकैः यदि सूच्येत तर्हि भविष्यत्काले तस्योपयोगः क्रियेत। पाठपुस्तकमिदमुद्दिष्टम् कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे।

**डॉ पि. ए. फातिमा,**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

## Textbook Development Team

1. **N.K.Ramachandran**, *(Rt.DEO), Wayanad*
2. **Sankaranarayanan.A,** *HSST (Sanskrit),Govt.Sanskrit HSS, Thripunithura*
3. **Krishnakumari.S**; *K.V Sanskrit HSS, Muthukulam, Alappuzha*
4. **Swayamprabha,** *HSST (Sanskrit) SNHSS, Irinjalakkuda, Thrissur*
5. **Anandakumari.P.N**, *HSST (Sanskrit), BSS HSS, Kollangode, Palakkad*
6. **Krishnan.O**, *HSST (Sanskrit), Kunnamangalam HSS, Kozhikode*
7. **Narayanan**, *HSST (Sanskrit), Govt.Model HSS, Kozhikkode*
8. **Madhu.N,** *HSST (Sanskrit), KVHSS, Muthukulam, Alappuzha*
9. **Nandakishor.R**; *HSST (Sanskrit), Aleemul Islam HSS, Padoor, Thrissur*
10. **Dr. Abhilash.J;** *HSST (Sanskrit), MKMHSS, Piravom, Ernakulam*
11. **Saji kumar A. V.,** *GHSS Karupadanna, Thrissur*

## Experts

**Prof. V.Vasudevan.;** *Associate Prof., Sreesankaracharya, University of Sanskrit, Regional Centre,Vanchiyoor, Thiruvananthapuram.*

**Dr.Vijayakumar**, *Director, Sreesankaracharya University of Sanskrit, Regional Centre, Vanchiyoor, Thiruvananthapuram*

## Academic Co-ordinators

**Dr.T.Kerala Sreemathy,** *Research Officer (Rtd), SCERT. Thiruvananthapuram*

**Dr.Rekha R Nair,** *Research Officer, SCERT, Thiruvananthapuram*

## CONTENT

# प्रथमो भागः


लघुसिद्धान्तकौमुदी। --------------- ७ -८८

संज्ञाप्रकरणम्। ----------------- ७-२१

अच्सन्धिप्रकरणम्। ------------- २२-४०

हल्सन्धिप्रकरणम्। -------------- ४१-५६

विसर्गसन्धिप्रकरणम्। ------------ ५७-६२

विभक्त्यर्थप्रकरणम्। ------------- ६३-७४

अधिकविस्तरः। ----------------- ७५-८१

# द्वितीयो भागः


- तर्कसंग्रहः ............................ ८९ - १५५
- आमुखम्। ............................ ८२ - ८३
- उद्देशप्रकरणम्। ......................... ८४ - ८७
- द्रव्यनिरूपणम्। ......................... ८८ - ९४
- गुणलक्षणप्रकरणम्। ................... ९५ - १०४
- कारणनिरूपणप्रकरणम्। .............. १०५ - १०८
- प्रत्यक्षप्रकरणम्। ........................ १०९ - ११४
- अनुमानप्रकरणम्। ..................... ११५ - १२८
- उपमानप्रकरणम्। ...................... १२९
- शाब्दप्रकरणम्। ........................ १३० - १३४
- अवशिष्टगुणनिरूपणप्रकरणम्। ...... १३५ - १४०
- अवशिष्टपदार्थनिरूपणप्रकरणम्। .... १४१ - १४५
- उपसंहारः। ............................. १४६
- अधिकविस्तरः। ........................ १४८ - १५५

१

# प्रथमो भागः

## वरदराजविरचिता
# लघुसिद्धान्तकौमुदी

**नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।**
**पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।।**

**येनाक्षरसमाम्नाय-**
**मधिगम्य महेश्वरात्।**
**कृत्स्नं व्याकरणं प्रोक्तं**
**तस्मै पाणिनये नमः।।**

## अथ संज्ञाप्रकरणम्

**माहेश्वराणि सूत्राणि -**

**अइउण्। (1) ऋलृक्। (2) एओङ्। (3) ऐऔच्। (4)**
**हयवरट्।(5) लण्। (6) ञमङणनम्। (7) झभञ्। (8)**
**घढधष्। (9) जबगडदश्। (10) खफछठथचटतव्। (11)**
**कपय्। (12) शषसर्।(13) हल्। (14)**

**इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि। एषामन्त्या इतः। हकारादिषु अकारः उच्चारणार्थः। लण् मध्ये तु इत्संज्ञकः।।**

(महेश्वरादागतं माहेश्वरम्। एवमुक्तं -

नृत्तावसाने नटराजराजो
ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धा -
नेतद्विमर्शे शिवसूत्रजालम्।। इति प्रसिद्धिः।)

शिवसूत्राविर्भावकथा-

सब्रह्मचारिणा सदा "मूढः पाणिनिः" इत्येवं परिहासपात्रीभूतः पाणिनिः नितरां

दुःखितः आसीत्। एकस्मिन् दिने माता तं नदीतटमानीय तत्रस्थं कामपि शिलां सूचयित्वा उवाच "पुत्र, प्रतिदिनं एतस्यामेव शिलायां घटनिक्षेपणात् तस्या आपि कश्चन परिणामः संवृत्तः। यदि अचेतनस्या अस्याः ईदृशी अवस्था निरन्तरेण अभ्यासेन जाता चेत् चेतनस्य ते कीदृशः परिणामः न संभवेत्। अतः निरन्तराभ्यासं कुरु" इति।

मातुरुपदेशं शिरसि निधाय व्याकरणज्ञानप्राप्त्यै सः महेश्वरं प्रसादयितुं तपश्चकार। कठिनतपसा सन्तुष्टः शिवः तस्य पुरतो आविर्भूय स्वढक्कां चतुर्दशवारं ननाद। ढक्कानिनदं शब्दब्रह्मत्वेन विज्ञाय पाणिनिः माहेश्वरसूत्राणि प्रत्यभिजानाति स्म। एतान्यधिकृत्येव सर्वं व्याकरणशास्त्रं पाणिनिना कृतम्।

शास्त्रपूरणार्थं कात्यायनेन वार्तिकानि पतञ्जलिना भाष्यञ्च कृतमिति विदुषां मतम्।

सूत्रलक्षणम् -

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।

सूत्रभेदः

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते।

पूर्वोक्तानां चतुर्दशमाहेश्वरसूत्राणामन्ते भवाः ण् क् ङ् इत्यादयः इतः। हयवरट् आरभ्य हल् पर्यन्तं सूत्रेषु अकारयोजनम् उच्चारणार्थम्। परं लण् सूत्रस्य अकारस्य इत् संज्ञा। इत् कः? उच्यते -

**सूत्रम् : हलन्त्यम्। 1/3/3/**

**इत् संज्ञा**

वृत्तिः : उपदेशे अन्त्यं हल् इत् स्यात्। उपदेश आद्योच्चारणम्। सूत्रेष्वदृष्टं पदं सूत्रान्तराद् अनुवर्तनीयं सर्वत्र।

टिप्पणी : हल् अन्त्यम् इति पदच्छेदः। अत्र उपदेश इत् इति पदद्वयं पूर्वस्मात् "उपदेशेऽजनुनासिक इत्" इति सूत्रात् अनुवर्तनीयम्। तदुक्तं सूत्रेष्वदृष्टं पदम् इत्यादिना। को नाम उपदेशः? उच्यते उपदेश आद्योच्चारणम्। आद्यानां महेश्वरपाणिनिवररुचीनाम् उच्चारणमित्यर्थः।

तदुक्तम् - "धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः।।" इति।

एवं सूत्राणि उपदेशाः भवन्ति, तेषाम् अन्त्याः हलः हयवरट्सूत्रस्थात् हकारादारभ्य हल् सूत्रस्थलकारपर्यन्तानां व्यञ्जनानां संज्ञा हल् इति। उपदेशे अन्त्यं हल् इत् संज्ञः स्यात् इति सूत्रार्थः

**लोप संज्ञा**

**सूत्रम् : अदर्शनं लोपः। 1/1/60/**

वृत्तिः : प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्।

टिप्पणी : दर्शनस्याभावः अदर्शनम्। प्रसक्तस्य अदर्शनस्य लोप इति संज्ञा।

**सूत्रम् : तस्य लोपः। 1/3/9/**

वृत्तिः : तस्य इतो लोपः स्यात्। णादयोऽणाद्यर्थाः ।

टिप्पणी : (तस्य इत्यनेन इतः इति सूचितः। पूर्वोक्तस्य इतः लोपः स्यात् इति सूत्रार्थः। अइउणादि सूत्रे णादयः इतः तेषां लोपः। णादयः अणादिप्रत्याहारार्थं सूत्रेषु योजिताः।)

प्रत्याहारः कः?

**सूत्रम् : आदिरन्त्येन सहेता। 1/1/71/**

वृत्तिः : अन्त्येन इता सहितः आदिः मध्यगानां स्वस्य च संज्ञा स्यात्। तथा-अण् इति अ इ उ वर्णानां संज्ञा। एवमच् हल् अल् इत्यादयः।।

**प्रत्याहारसंज्ञा।**

प्रत्याह्रियन्ते (संक्षिप्यन्ते ) वर्णाः अनेन इति प्रत्याहारः।

टिप्पणी : आदिः अन्त्येन सह इता इति पदच्छेदः। सुत्रार्थः स्पष्टः। एवम् अण् इत्युक्ते अ इ उ वर्णाः, अच् इत्युक्ते सर्वे स्वराः, हल् इत्युक्ते व्यञ्जनानि सर्वाण्यपि बोद्धव्यानि।

द्वितीयस्य अणः लण्सूत्रस्थणकारेण सह प्रत्याहारः।

लण् सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफः रलयोः संज्ञा। अतः र इति प्रत्याहारेण विवक्षायां र, ल वर्णयोः ग्रहणम्।।

| प्रत्याहाराणाम् अकारादिक्रमेण परिसंख्या | | | | | |
|---|---|---|---|---|---|
| १. अक् | ८. अश् | १५ ऐच् | २२. जश् | २९. भष् | ३६. रल् |
| २. अच् | ९. इक् | १६. खय् | २३. झय् | ३०. मय् | ३७. वल् |
| ३. अट् | १०. इय् | १७. खर् | २४. झर् | ३१. यञ् | ३८. वश् |
| ४. अप् | ११. इण् | १९. चय् | २५. झल् | ३२. यण् | ३९. शर् |
| ५. अण् | १२. उक् | २०. चर् | २६. शश् | ३३. यम् | ४०. शल् |
| ६. अम् | १३. एङ् | २१. छव् | २७. झष् | ३४. यय् | ४१. हल् |
| ७. अल् | १४. एच् | | २८. बश् | ३५. यर् | ४२. हश् |

**सूत्रम् : ऊकालोऽज्ह्रस्वदीर्घप्लुतः। 1/2/27/**

**ह्रस्वदीर्घप्लुतः संज्ञा**

वृत्तिः : उश्च ऊश्च उ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा।

टिप्पणी : ऊकालः अच् ह्रस्वदीर्घप्लुतः इति पदच्छेदः। ह्रस्वश्च दीर्घश्च प्लुतश्च एषां समाहारः ह्रस्वदीर्घप्लुतः। कुक्कुटकूजने चिरपरिचितः उकारस्य कालभेदः एवात्र दृष्टान्तत्वेन स्वीकृतः। एवम् एकमात्रः अच् ह्रस्वः, द्विमात्रः दीर्घः, त्रिमात्रः प्लुतश्च भवति इति आशयः। तदुक्तम् -

**अचां भेदाः के?**

एकमात्रोऽच् भवेद्ध्रस्वो
द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो
व्यञ्जनं त्वर्धमात्रकम्।। इति।


ह्रस्वदीर्घप्लुतानां त्रैविध्यं कथमिति सूचयति -

**सूत्रम् : उच्चैरुदात्तः। 1/2/29/**

वृत्तिः : ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नोऽज् उदात्तसंज्ञः स्यात्।

टिप्पणी : ताल्वादयः - कण्ठः, तालु, दन्ताः, मूर्धा, ओष्ठौ, नासिका च।

**उदात्तसंज्ञा।**




**सूत्रम् : नीचैरनुदात्तः। 1/2/30/**

**अनुदात्तसंज्ञा।**

वृत्तिः : ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्। स्पष्टम्।

**सूत्रम् : समाहारः स्वरितः। 1/2/31/**

वृत्तिः : उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्।

टिप्पणी : स्वरितस्वरस्य पूर्वार्धम् उदात्तः उत्तरार्धम् अनुदात्तश्च भवति। अस्य वेदेष्वेव प्रामाण्यमस्ति। एवं प्रत्येकम् अच् नवविधः भवति। तथा ह्रस्वोदात्तः ह्रस्वानुदात्तः ह्रस्वस्वरितः, दीर्घोदात्तः दीर्घानुदात्तः दीर्घस्वरितः प्लुतोदात्तः प्लुतानुदात्तः प्लुतस्वरितः इति नवविधः भवति।

**स्वरितसंज्ञा।**

वृत्तिः : स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा।

एवं स्वरस्यैकस्य अष्टादशभेदाः सन्ति। अनुनासिकः कः इति सूचयति-

## अष्टादशभेदविवरणम्।

| अ इ उ ऋ ऌ | अ इ उ ॠ ए ओ ऐ औ | अ इ उ ऋ ऌ ए ओ ऐ औ |
|---|---|---|
| *ह्रस्वभेदाः।* | *दीर्घभेदाः* | *प्लुतभेदाः।* |
| १. उदात्तानुनासिकः | ७. उदात्तानुनासिकः | १३. उदात्तानुनासिकः |
| २. उदात्ताननुनासिकः | ८. उदात्ताननुनासिकः | १४. उदात्ताननुनासिकः |
| ३. अनुदात्तानुनासिकः | ९. अनुदात्तानुनासिकः | १५. अनुदात्तानुनासिकः |
| ४. अनुदात्ताननुनासिकः | १०. अनुदात्ताननुनासिकः | १६. अनुदात्ताननुनासिकः |
| ५. स्वरितानुनासिकः | ११. स्वरितानुनासिकः | १७. स्वरितानुनासिकः |
| ६. स्वरिताननुनासिकः | १२. स्वरिताननुनासिकः | १८. स्वरिताननुनासिकः |

**सूत्रम् : मुखनासिकावचनोऽनुनासिकः। 1/1/8/**

**अनुनासिकसंज्ञा।**

वृत्तिः : मुखसहितनासिकयोच्चार्यमाणो वर्णः अनुनासिकसंज्ञः स्यात्।

टिप्पणी : मुखसहिता नासिका मुखनासिका, उच्यते इति वचनः - उच्चार्यमाणः इत्यर्थः। मुखनासिकया वचनः मुखनासिकावचनः। ङ ञ ण न म एते अनुनासिकाः। एवम्,

अ इ उ ऋ एतेषां प्रत्येकम् अष्टादशभेदाः। ऌकारस्य द्वादशभेदाः - तस्य दीर्घाभावात्। ए ऐ ओ औ एतेषामपि द्वादशभेदाः तेषां ह्रस्वाभावात्।

**सूत्रम् : तुल्यास्यप्रयत्नं सवर्णम्। 1/1/9/**

**सवर्णसंज्ञा।**

वृत्तिः : ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च इत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।

टिप्पणी : आस्ये भवम् आस्यम् - ताल्वादिस्थानमित्यर्थः। प्रकृष्टो यत्नः प्रयत्नः। आभ्यन्तरयत्न इत्यर्थः। आस्यं च प्रयत्नः च आस्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम्।

वार्तिकम् : "ऋलृवर्णयोर्मिथः सावर्ण्यम् वाच्यम्"। ऋकारस्य स्थानं मूर्धा, लृकारस्य च दन्ताः। तयोः आभ्यन्तरप्रयत्नः विवृतश्च। स्थानसाम्याभावात् वस्तुतः ऋकारलृकारौ मिथः न सवर्णौ। तयोः सावर्ण्यार्थं वार्तिककारः एवं वदति।
वर्णानां स्थानानि यथा-

**वर्णानां स्थानानि।**

- अकुहविसर्जनीयानां कण्ठः। (अकारः, कवर्गः, हकारः, विसर्गश्च कण्ठ्याः।)
- इचुयशानां तालु।
  (इकारः, चवर्गः, यकारः, शकारश्च तालव्याः।)
- ऋटुरषाणां मूर्धा।
  (ऋकारः, टवर्गः, रेफः, षकारश्च मूर्धन्याः।)
- लृतुलसानां दन्ताः।
  (लृकारः, तवर्गः, लकारः, सकारश्च दन्त्याः।)
- उपूपध्मानीयानामोष्ठौ।
  (उकारः, पवर्गः, उपध्मानीयञ्च ओष्ठ्याः। पकारफकाराभ्यां प्राक् अर्धविसर्गसदृशः (ᳶ प ᳶ फ) उपध्मानीयः।)
- ञमङणनानां नासिका च।
  (एतेषां तत्तद्वर्गानुकूलं स्थानं नासिका च। उदाः- ङकारस्य कवर्गस्थानं कण्ठः नासिका च।)
- एदैतोः कण्ठतालु।
  (ए ऐ एतयोः कण्ठः तालु च स्थानम्। अकारइकारयोः योगे एकारः। अकार एकारयोर्योगे ऐकारश्च भवति इत्यतः एवम्।)
- ओदौतोः कण्ठोष्ठम्।
  (ओ औ एतयोः कण्ठः ओष्ठौ च स्थानम्। अकार उकारयोः योगे ओकारः, अकार ओकारयोः योगे औकारश्च भवतः इत्यतः एवम्।)
- वकारस्य दन्तोष्ठम्। स्पष्टम्।
- जिह्वामूलीयस्य जिह्वामूलम्।
  कखाभ्यां प्राग् अर्धविसर्गसदृशः (ᳵ क ᳵ ख) जिह्वामूलीयः।
- नासिकानुस्वारस्य।

# वर्णोद्भवस्थानकोष्ठकम् ।

## स्थानानि

| | कण्ठः | तालु | मूर्धा | दन्ताः | ओष्ठौ | नासिका | कण्ठतालु | कण्ठोष्ठम् | दन्तोष्ठम् | जह्वामूलम् |
|---|---|---|---|---|---|---|---|---|---|---|
| वर्णाः | अ | इ | ऋ | ऌ | उ | ञ | ए | ओ | व | ≍क |
| वर्णाः | क | च | ट | त | प | म | ऐ | औ | | ≍ख |
| वर्णाः | ख | छ | ठ | थ | फ | ङ | | | | |
| वर्णाः | ग | ज | ड | द | ब | ण | | | | |
| वर्णाः | घ | झ | ढ | ध | भ | न | | | | |
| वर्णाः | ङ | ञ | ण | न | म | ं | | | | |
| वर्णाः | ह | य | र | ल | | | | | | |
| वर्णाः | : | श | ष | स | ≍प ≍फ | | | | | |

स्थानप्रतिपादनानन्तरं यत्नं प्रतिपादयति-

- यत्नो द्विधा - आभ्यन्तरो बाह्यश्च। आभ्यन्तरप्रयत्नः पञ्चधा।

  स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् (स्पृष्टः ईषत्स्पृष्टः ईषद्विवृतः विवृतः संवृतः इति आभ्यन्तरप्रयत्नाः पञ्च।)

- तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्।

  (कादयो मावसानाः स्पर्शाः। तेषां प्रयत्नं स्पृष्टम्।)

- ईषत्स्पृष्टमन्तःस्थानाम्।

  (य व र ल एते अन्तःस्थाः। तेषां प्रयत्नः ईषत्स्पृष्टः।)

- ईषद्विवृतमूष्मणाम्।

  श ष स ह एते ऊष्माणः। प्रयत्नः तु ईषद्विवृतः।

- विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतं, प्रक्रियादशायां तु विवृतमेव। इति आभ्यन्तरप्रयत्नविवेकः।

- बाह्यप्रयत्नश्च एकादशधा। विवारः, संवारः, श्वासो, नादो, घोषोऽघोषोऽल्पप्राणो, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्चेति।

  खरो विवाराः श्वासाः अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमाः यणश्च अल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः।

## आभ्यन्तर बाह्यप्रयत्नज्ञानार्थकम् कोष्ठकम्

| आभ्यन्तर प्रयत्नाः | स्पृष्टाः | | | | ईषत्स्पृष्टाः | ईषद्विवृताः । | | विवृताः । | संवृताः । |
|---|---|---|---|---|---|---|---|---|---|
| **संज्ञा** | *स्पर्शाः* | | | | *अन्तस्थाः* | *ऊष्माणः* | | *स्वराः* | |
| **वर्णाः** | क ख<br>च छ<br>ट ठ<br>त थ<br>प फ | ग<br>ज<br>ड<br>द<br>ब | घ<br>झ<br>ढ<br>ध<br>भ | ङ<br>ञ<br>ण<br>न<br>म | य<br>व<br>र<br>ल | श<br>ष<br>स | ह | अ इ उ<br>ऋ लृ ए<br>ओ ऐ औ | ह्रस्वोऽकारः<br>प्रयोगे |
| **बाह्यप्रयत्नाः** | अल्पप्राणः<br>महाप्राणः<br>विवाराः<br>श्वासाः<br>अघोषाः | अ.प्र<br>संवारः<br>नादाः<br>घोषाः | म.प्र<br>संवारः<br>नादाः<br>घोषाः | अ.प्र<br>सेवारः<br>नादाः<br>घोषाः | अ. प्रा<br>संवारः<br>नादाः<br>घोषाः | म.प्रा<br>विवाराः<br>श्वाासाः<br>अघोषाः | मप्रा<br>संवारः<br>नादाः<br>घोषाः | उदात्त<br>अनुदात्त<br>स्वरितः | |

**सूत्रम् : अणुदित्सवर्णस्य चाप्रत्ययः। 1/1/69/**

वृत्तिः : प्रतीयते - विधीयते इति प्रत्ययः। अविधीयमानः अण् उदित् च सवर्णस्य संज्ञा स्यात्। अत्रैवाण् परेण णकारेण। कु चु टु तु पु एते उदितः।

टिप्पणी : अण् उदित् सवर्णस्य च अप्रत्ययः इति पदच्छेदः। **अत्र एव अण् प्रत्याहारः लण् _सूत्रस्थणकारेण इति बोध्यम्।** अतः स्वराः, ह य व र ल एतानि व्यञ्जनानि च तत्रान्तर्भवन्ति। अप्रत्ययः इति पदम् अण् इत्यस्य विशेषणं, न तु उदित् इत्यस्य। अतः अप्रत्ययः (अविधीयमानः) अण् उदित् च सवर्णस्य संज्ञा स्यात् इति सूत्रार्थः।

**अण् प्रत्याहारः कुतः द्विधा उक्तम्?**

एवम् अ इत्युक्ते पूर्वोक्तह्रस्वादीर्घप्लुतादिभेदेन भिन्नानां अष्टादशानाम् अकाराणां संज्ञा। तथा इकार-उकारौ। ऋकारस्त्रिंशतः (ऋकारः 18 + ऌकारः 12)

एवम् ऌकारोऽपि (ऋकारः 18 + ऌकारः 12)

एचः द्वादशानां संज्ञा। ह्रस्वाभावात्। अनुनासिकाननुनासिकत्वाभ्यां यवलाः द्विधा। तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा।

**सूत्रम् : परः सन्निकर्षः संहिता। 1/4/108/**

वृत्तिः : वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।

टिप्पणी : वर्णानामर्धमात्रापर्यन्तं व्यवधानमावश्यकम्। तत ऊर्ध्वं व्यवधानमस्ति चेत् संहिता नास्ति। संहितायां सत्यामेव सन्धिः।

**संहितासंज्ञा।**

"संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते।।"

**सूत्रम् : हलोऽनन्तराः संयोगः। 1/1/7/**

**संयोगसंज्ञा।**

वृत्तिः : अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युः।।

टिप्पणी : न विद्यते अन्तरा (मध्ये) येषां ते अनन्तराः। हलः अनन्तराः संयोगः इति पदच्छेदः। हल् इति व्यञ्जनसूचकः प्रत्याहारः।

एवं स्वरैः अव्यवहिताः हलः संयोगसंज्ञाः स्युः इत्यर्थः। उदाः- स्त्री इत्यस्मिन् स् त् र् इत्येतेषां मध्ये स्वरो नास्तीत्यतः संयोगः।


**सूत्रम् : सुप्तिङन्तं पदम्। 1/4/14/**

**पदसंज्ञा।**

वृत्तिः : सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।

टिप्पणी : सुप् च तिङ् च सुप्तिङौ। सुप्तिङौ अन्ते यस्य तत् सुप्तिङन्तम् इति विग्रहः। सुप् इत्यनेन सु औ जस् इत्यादयः एकविंशतिः विभक्तिप्रत्ययाः बोध्याः। एवं तिङ् इत्यनेन तिप् तस् झि इत्येवमादयः अष्टादशप्रत्ययाः गृह्यन्ते। रामः इत्यादि सुबन्तं पदम्। भवतीत्यादि तिङन्तं पदम्।

इति संज्ञाप्रकरणम्।



## पठनप्रवर्तनानि

१. संज्ञाविधायकानि सूत्राणि लिखत।

क. लोपः। ख. सवर्णम्। ग. संयोगः।घ. अनुनासिकः।

ङ. उदात्तः। च. पदम्। छ. इत्।

२. अधो दत्तानां प्रत्याहाराणां साधुतां परीक्षन्ताम्।

क. अ इ उ ऋ - अक्।

ख. ज ग ड द - जश्।

ग. ए ऐ औ - एच्।

घ. श ष स - शर्।

ङ. य व र - यण्।

३. अधः प्रदत्तानि अक्षराणि स्थानानुसारं पट्टिकारूपेण लिखत।

अ इ त ऋ फ व ङ ख ल ष।

| | | | | | |
|---|---|---|---|---|---|
| | | | | | |

४. प्रदत्ते चित्रे वलयेषु स्थानानुसारं वर्णान् योजयन्तु?



५. अधः प्रदत्तानां सूत्राणां संज्ञाविधयकत्वे किं प्रयोजनम् इति सोदाहरणं समर्थयत।

क. हलन्त्यम्। ख. परः सन्निकर्षः संहिता।

६. उत्तराणि लिखत

क. अण् इत्यत्र णकारस्य इत्संज्ञा केन सूत्रेण विधीयते?

ख. स्वरितसंज्ञा केन सूत्रेण विधीयते?

ग. अच् इति प्रत्याहारे कति अक्षराणि सन्ति?

घ. हकारादिषु अकारः किमर्थः?

ङ. औकारस्य उच्चारणस्थानम् किम्?

### पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | परिहारनिर्देशः |
|---|---|---|---|---|
| 1. | संज्ञाविधायकानि सूत्राणि लिखितानि। | | | |
| 2. | दत्तानां प्रत्याहाराणां साधुता परीक्षिता। | | | |
| 3. | अक्षराणि स्थानानुसारं पट्टिकारूपेण लिखतानि। | | | |
| 4. | चित्रे वलयेषु वर्णाः योजिताः। | | | |
| 5. | सङ्गोष्ठी चालिता | | | |
| 6. | उत्तराणि लिखतानि। | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संख्यया सूचयन्तु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

## पठनाधिगमाः

- सूत्रलक्षणं, वार्तिकलक्षणं भाष्यलक्षणं च वदति।
- माहेश्वरसूत्राणि वदति लिखति च।
- संज्ञासूत्राणि, व्याख्याति, लिखति च।
- माहेश्वरसूत्राणि ज्ञात्वा अणादि प्रत्याहारान् निर्माति ।
- वर्णानां स्थानानि प्रयत्नानि च विशदयति, विवेचयति, वदति।
- स्थानानुसारं वर्णान् उच्चरति।
- सूत्रसाहाय्येन उच्चारणस्थानानि, प्रयत्नानि विवेचयति वदति लिखति च। सवर्णसंज्ञाम्, पदसंज्ञां च विवेचयति वदति लिखति च।

२

# अथ अच्सन्धिप्रकरणम्।

| | | | | |
|---|---|---|---|---|
| इ | + | अच् | - | य |
| उ | + | अच् | - | व |
| ऋ | + | अच् | - | र |
| लृ | + | अच् | - | ल |

**सूत्रम् : इको यणचि। 6/1/77/**

वृत्तिः : इकः स्थाने यण् स्यादचि संहितायां विषये।

टिप्पणी : इकः यण् अचि इति पदच्छेदः। इक् इत्यनेन इ उ ऋ लृ वर्णानां ग्रहणम्। इकः इति षष्ठीविभक्तिः। इ उ ऋ लृ वर्णानां स्थाने इत्यर्थः। यण् इत्यनेन य व र ल वर्णानां ग्रहणम्।अचि इति सप्तमी। सप्तमीनिर्देशेन स्वरे परे अव्यवहितपूर्वस्य इत्यर्थः। (संहितायाम् इति सूत्रमनुवर्तते।)

सुधीभिः उपास्यः इति विग्रहे विभक्तिलोपे सुधी + उपास्यः इति स्थिते उपास्य इति उकारस्वरे परे सुधी इत्यस्य उकारईकारयोः कस्य यण् स्यात् इति संशयः, तदर्थं सूत्रम् -

**सूत्रम् : तस्मिन्निति निर्दिष्टे पूर्वस्य। 1/1/66/**

वृत्तिः : सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण अव्यवहितस्य पूर्वस्य बोध्यम्।

टिप्पणी : सूत्रे इतिशब्दप्रयोगेण तस्मिन् इत्यस्य अर्थस्य ग्रहणम्, न तु शब्दस्य। तथाहि तस्मिन्निति इत्यस्य सप्तम्यन्तम् इत्यर्थः। सप्तमीविभक्त्या निर्दिष्टं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् इत्यर्थः। एवम् "इको यणचि" इति सूत्रे अचि इति सप्तम्या निर्दिष्टः यण् अव्यवहितपूर्वस्य सुधी इत्यस्य ईकारस्यैव न तु उकारस्य।

**सूत्रम् : स्थानेऽन्तरतमः। 1/1/50/**

वृत्तिः : प्रसङ्गे सति सदृशतमः आदेशः स्यात्।

टिप्पणी : इक् इति पदेन षट्षष्टिः वर्णानां ग्रहणं, यण् इत्यनेन केवलं चतुर्णां ग्रहणम्। अतः स्थानिनः इकः आदेशस्य यणश्च संख्या न तुल्या। तेनैव यथासंख्यम् आदेशो न संभवति। तस्मात् इकारस्य य व र ल एते वर्णाः आदेशाः प्राप्ताः। तत्परिहर्तुमिदं सूत्रम्।

स्थाने अन्तरतमः इति पदच्छेदः। अत्यन्तम् अन्तरः अन्तरतमः। सदृशतमः इत्यर्थः। स्थानसाम्येन सदृशतमः आदेशः भवति इति सूत्रार्थः।

सुध् य् उपास्यः इति स्थिते;

**सूत्रम् : अनचि च। 8/4/47/**

वृत्तिः : अचः परस्य यरो द्वे वा स्तः, न त्वचि।

टिप्पणी : यरः, वा, अचः, द्वे एतानि पदानि "अचो रहाभ्यां द्वे" इति सूत्रात् अनुवर्तन्ते। न अच् अनच्, तस्मिन् अनचि। अत्र धकारस्य द्वित्वम्। सुध्ध्य् उपास्यः इति स्थिते -

सुधी + उपास्यः,सुध् य् उपास्यः

सु ध् ध् य् उपास्यः

**सूत्रम् : झलां जश् झशि। 8/4/53/**

वृत्तिः : झलां स्थाने जश् स्याद् झशि परे।

इति प्रथमधकारस्य दकारः-सुद्ध्य् उपास्यः। सुद्ध्युपास्यः इति रूपम्। द्वित्वाभावे सुध्युपास्यः इति।

**सुत्रम् : संयोगान्तस्य लोपः। 8/2/23/**

वृत्तिः : संयोगान्तं यत् पदं तदन्तस्य लोपः स्यात्।

टिप्पणी : संयोगो अन्ते यस्य तत् संयोगान्तं, तस्य इति विग्रहः। पदस्य इत्यनुवर्तनीयम्।

**सूत्रम् : अलोऽन्त्यस्य। 1/1/52/**

वृत्तिः : षष्ठीनिर्दिष्टो अन्त्यस्यालः आदेशः स्यात्।

टिप्पणी : अनेन पदस्य विधीयमानः लोपः पदान्तस्य वर्णस्य इति सिध्यति। सुद्ध्युपास्य इत्युदाहरणे द्ध्य् इति संयोगः अस्ति। तस्यान्तस्य यकारस्य अनेन सूत्रेण लोपः प्राप्नोति, तन्निषेधवार्तिकम् -

? अद्ध्यापकः

वार्तिकम्:-"यणः प्रतिषेधो वाच्यः।"

संयोगान्तस्य यणः लोपो न इति वक्तव्यम् इति वार्तिकस्यार्थः। सुद्ध्युपास्यः इति रूपम्। एवं मध्वरिः, धात्रंशः, लाकृतिः।

**सूत्रम् : एचोऽयवायावः। 6/1/78/**

वृत्तिः : एचः क्रमाद् अय् अव् आय् आव् एते स्युः अचि।

टिप्पणी : एचः अयवायावः इति पदच्छेदः। "इको यणचि" इति सूत्रात् अचि इत्यनुवर्तते। अचि परे कस्य वर्णस्य कः आदेशः इति आकाङ्क्षां परिहर्तुम् उच्यते;

**ए + अच् - अय्**
**ओ + अच् - अव्**
**ऐ + अच् - आय्**
**औ+ अच् - आव्**

**सूत्रम् : यथासङ्ख्यमनुदेशः समानाम्। 1/3/17/**

वृत्तिः : समसम्बन्धी विधिः यथासंख्यं स्यात्। हरये, विष्णवे, नायकः, पावकः।

टिप्पणी : संख्यामनतिक्रम्य यथासंख्यम्। (अनुदेश इत्यस्य विधिः इत्यर्थः।) प्रकृते स्थानिनः चत्वारः, आदेशाश्च चत्वारः। अतः प्रथमस्य स्थानिनः प्रथमः आदेशः इति क्रमः।

हरे + ए इति स्थिते अनेन एकारस्य अयादेशे हरये। एवम् विष्णवे, नायकः, पावकः इत्यादयोऽपि।

हरे + ए - हरये
विष्णो + ए - विष्णवे
नै + अकः - नायकः
पौ + अकः - पावकः

**सूत्रम् : वान्तो यि प्रत्यये। 1/6/79/**

वृत्तिः : यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः। गव्यम्, नाव्यम्।

टिप्पणी : वान्तः यि प्रत्यये इति पदच्छेदः। यि इति सप्तम्यन्तेन यकारादौ प्रत्यये परे इत्यर्थो लभ्यते। गोः विकारः इत्यर्थे गो शब्दात् यत् प्रत्ययः तकारः इत् इतः, लोपः गो + यम् इति जाते यम् इति यकारादौ प्रत्यये परे "वान्तो यि प्रत्यये" इति सूत्रेण अवादेशः -गव्यम् इति रूपम्।
एवं नावा तार्यम् इति विग्रहे यत् प्रत्ययः नौ यम्, आवादेशे नाव्यम् इति रूपम्।।

गो + यम् - गव्यम्
नौ + यम् - नाव्यम्

वार्तिकम् : "अध्वपरिमाणे च।"

अध्वपरिमाणे गो शब्दात् यूति शब्दे परे ओकारस्याव् आदेशः इत्यर्थः।

गो + यूतिः गव्यूतिः, क्रोशयुगमित्यर्थः।

**सूत्रम् : अदेङ् गुणः। 1/1/2/**

वृत्तिः : अत् एङ् च गुणसंज्ञः स्यात्।

**गुणसंज्ञा**
**अ, ए, ओ**

**सूत्रम् : तपरस्तत्कालस्य। 1/1/70/**

वृत्तिः : तः परो यस्मात् स च तात्परश्च उच्चार्यमाणः समकालस्यैव संज्ञा स्यात्।

टिप्पणी : "अदेङ् गुणः" इति सूत्रे अत् इत्युक्ते ह्रस्वस्य अकारस्य एव ग्रहणमिति समर्थनार्थं सूत्रमिदम्।एवम् अ ए ओ एते गुणसंज्ञकाः इति लभ्यन्ते।

**सूत्रम् : आद्गुणः। 6/1/87/**

वृत्तिः : अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात्। उपेन्द्रः, गङ्गोदकम्।

टिप्पणी : आत् गुणः इति पदच्छेदः। 'इको यणचि' इति सूत्रात् अचि इति पदम्, "एकः

पूर्वपरयोः” इति सूत्रञ्च अनुवर्तेते। अ शब्दस्य पञ्चम्येकवचनम् आत् इति। अवर्णादित्यर्थः। एवम् अवर्णात् अचि परे पूर्वपरयोः गुणः एकादेशः स्यादिति सूत्रार्थः। गज + इन्द्रः इति स्थिते गजशब्दस्थाकारात् इकारे परे अकारइकारयोः ए इत्येकादेशः। गजेन्द्रः इति रूपम्। एवम् उप + इन्द्रः उपेन्द्रः। गङ्गा + उदकम् गङ्गोदकम्।

*उप + इन्द्रः - उपेन्द्रः।*
*गङ्गा + उदकम् - गङ्गोदकम्।*

**सूत्रम् : उपदेशेऽजनुनासिक इत्। 1/3/2/**

वृत्तिः : उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात्। “प्रतिज्ञानुनासिक्याः पाणिनीयाः”। एवं लण् सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफः रलयोः संज्ञा।

टिप्पणी : उपदेशाः धातुसूत्रगणोणादयः इत्युक्तम्। तत्र अनुनासिकस्य अचः इत्संज्ञा इति सूत्रार्थः। अचः अनुनासिकत्वम् अननुनासिकत्वं च कथं ज्ञायते इति चेत् उच्यते - पाणिनीयाः वैयाकरणाः वर्णाः वाक्परम्परया ज्ञायमानानुनासिकधर्मज्ञाः इत्यर्थः। एतत् गुरूपदेशात् ग्राह्यमिति भावः।

**सूत्रम् : उरण् रपरः। 1/1/51/**

वृत्तिः : ऋकारस्य स्थाने योऽण् सः रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः। तवल्कारः।

टिप्पणी : उः अण् रपरः इति पदच्छेदः। उः इति ऋ इत्यस्य षष्ठ्येकवचनम्। रः परः यस्मात् स रपरः। र इति प्रत्याहारः। हयवरट्सूत्रस्थरेफः लण् सूत्रस्थानुनासिकेनाकारेण सहोच्चार्यमाणः। र इति प्रत्याहारेण रलयोर्ग्रहणम्। एवम् ऋकारस्य स्थाने अण् रपरः लृकारस्य स्थाने लपरश्च भवति।

**ऋ + अण् -अर्, ...**
**लृ + अण् - अल्, ...**

ब्रह्मा ऋषिः इति स्थिते ‘आद् गुणः’ इति आकार, ऋकारयोः अकार एकादेशे “उरण् रपरः” इति रपरे ब्रह्मर्षिः इति रूपम्। एवं कृष्णर्द्धिः।

*ब्रह्मा + ऋषिः - ब्रह्मर्षिः*

*तव + लृकारः - तवल्कारः*

**सूत्रम् : लोपः शाकल्यस्य। 8/3/19/**

वृत्तिः : अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वा अशि परे। हर इह हरयिह। विष्ण इह, विष्णविह।

टिप्पणी : शाकल्यः पाणिनेः प्राचीनः वैयाकरणः। अपूर्वस्य, पदान्तस्य, अशि व्योः इति पदानि अनुवर्तन्ते। एवमन्यत्रापि शाकल्यग्रहणात् लोपस्य वैकल्पिकत्वम्। हरे इह इति स्थिते "एचोऽयवायावः" इति सूत्रेण अयादेशे हरय् इह इति जाते हरय् इति पदस्यान्तिमस्य यकारस्य लोपः शाकल्यमते। हर इह। लोपाभावे हरयिह इत्यपि। एवं विष्ण इह इत्यत्रापि।

*हर इह इति स्थिते "आद् गुणः" इति सूत्रेण गुण एकादेशः कथं न भवति?*

**सूत्रम् : पूर्वत्रासिद्धम् । 8/2/1/**

वृत्तिः : सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।

टिप्पणी : पूर्वत्र असिद्धम् इति पदच्छेदः। पूर्वत्र इति सप्तम्यर्थे त्रल्। न सिद्धं (निष्पन्नं) असिद्धम्। अष्टाध्यायीग्रन्थस्य अष्टमाध्यायस्य द्वितीयपादे प्रथमं सूत्रमिदम्। इतः परं त्रयः पादाः सन्ति। अतः परस्य त्रिपादीति संज्ञा। तेन पूर्वशब्देन सप्ताध्यायाः अष्टमाध्यायस्य प्रथमपादश्च ग्राह्याः। तथा सपादसप्ताध्यायीति लभ्यते।

"आद् गुणः" इति सूत्रं षष्ठाध्याये प्रथमपादे ८७ तमं भवति। "लोपः शाकल्यस्य" इति सूत्रम् अष्टमाध्याये तृतीयपादे १९ तमं भवति। अतः हर इह इत्यत्र "आद् गुणः" इति सूत्रं न प्रवर्तते, यकारलोपस्यासिद्धत्वात्। "आद् गुणः" इति षाष्ठं गुणशास्त्रं प्रति त्रैपादिकं लोपशास्त्रमसिद्धम्।

**सूत्रम् : वृद्धिरादैच्। 1/1/1/**

**वृद्धिसंज्ञा आ, ऐ, औ**

वृत्तिः : आत् ऐच्च वृद्धिसंज्ञः स्यात्।

टिप्पणी : आत् इत्यनेन दीर्घः आकारः गृह्यते। ऐच् इत्यनेन ऐ औ वर्णयोः ग्रहणम्। एवं दीर्घः आकारः ऐ औ च वृद्धिसंज्ञः स्यात् इत्यर्थः।

**सूत्रम् : वृद्धिरेचि। 6/1/88/**

वृत्तिः : आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम्, गङ्गौघः। देवैश्वर्यम्, कृष्णौत्कण्ठ्यम्।

**गुणापवादः**

टिप्पणी : वृद्धिः एचि इति पदच्छेदः। "आद् गुणः" इति सूत्रात् आत् इति "एकः पूर्वपरयोः" इति सूत्रं च अनुवर्तते। अवर्णाद् एचि परे पूर्वपरयोः वृद्धिः एकादेशः स्यात् इत्यर्थः। सूत्रमिदम् "आद् गुणः" इत्यस्यापवादः भवति। अथ एकदा इति स्थिते "वृद्धिरेचि" इति सूत्रेण अकारएकारयोः ऐकार एकादेशे अथैकदा इति रूपम्। गुणस्यापवादत्वात् "आद् गुणः" इति सूत्रम् नैव प्रवर्तते। "परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः" इति नियमेन अपवादसूत्रस्य बलीयस्त्वात्। एवं जल + ओघः = जलौघः। सर्व + ऐश्वर्यम् = सर्वैश्वर्यम् इत्यादयोऽपि।

*कृष्ण + एकत्वम् - कृष्णैकत्वम्।*

*गङ्गा +ओघः - गङ्गौघः।*

*देव + ऐश्वर्यम् - देवैश्वर्यम्।*

**सूत्रम् : एत्येधत्यूठ्सु। 6/1/89/**

वृत्तिः : अवर्णाद् एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः, उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम्? उपेतः। मा भवान् प्रेदिधत्।

**पररूपगुणापवादः**

टिप्पणी : एतिश्च एधतिश्च ऊठ् च एत्येधत्यूठः तेषु। वृद्धिरेचि, एकः पूर्वपरयोः आत् इत्यादीनि अनुवर्तन्ते।।

उदाः - उप + एति इति स्थिते अनेन वृद्धौ उपैति इति। एवम् उपैधते (उप + एधते)। ननु "वृद्धिरेचि" इति सूत्रेणैव अत्र वृद्धिः स्यात् पुनः किमर्थमिदं सूत्रमिति चेत् अत्र वृद्धिरेव भवति इति नियमार्थम्। अन्यथा "एङि पररूपम्" इति वक्ष्यमाणसूत्रेण पररूपमेकादेशः भवेत्। अपि च प्रष्ठ + ऊहः = प्रष्ठौहः इत्यत्र गुणं बाधित्वा वृद्धिरेव। एजाद्योः इत्युक्तत्वात् उप + इतः (इ धातोरेजादित्वाभावात्) गुण एव, न वृद्धिः।

उप + एति - उपैति
उप + एधते - उपैधते
प्रष्ठ + ऊहः = प्रष्ठौहः

वार्तिकम् : अक्षादूहिन्यामुपसंख्यानम्। अक्षौहिणी सेना।

टिप्पणी : अक्ष शब्दात् ऊहिनीशब्दे परे वृद्धिरेव भवेत् इति वार्तिककारः। अत्र "आद् गुणः" इति गुणं बाधित्वा अकार,ऊकारयोः औकार एकादेशः एव।

वार्तिकम् : "प्रादूहोढोढ्यैषैष्येषु।"

प्र शब्दात् ऊह, ऊढ, ऊढि, एष, एष्य एतेषु परेषु वृद्धिरेकादेशः स्यादित्यर्थः। प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः, इत्यादीनि उदाहरणानि।

वार्तिकम् : "ऋते च तृतीयासमासे।" सुखेन ऋतः सुखार्तः। तृतीयेति किम्? - परमर्तः।

परम + ऋतः = परमर्तः

टिप्पणी : तृतीयासमासे अवर्णात् ऋतशब्दे परे वृद्धिरेकादेशः। सुखेन ऋतः - सुखार्तः। सुख ऋत इति स्थिते ऋकारस्य स्थाने आकारे "उरण् रपरः" इति रपरे सुखार्तः इति। परमश्चासौ ऋतश्च इति विग्रहे कर्मधारयसमासे वृद्धिः नेति सूचयितुं तृतीयासमासे इति पदम्। परमर्तः इति गुण एव।

वार्तिकम् : "प्रवत्सतरकम्बलवसनार्णदशानामृणे।" प्र, वत्सतर, कम्बल, वसन, ऋण, दश एतेभ्यः ऋणशब्दे परे वृद्धिरेकादेशः। प्रार्णम्, वत्सतरार्णम्, कम्बलार्णम् इत्यादीनि उदाहरणानि।

**सूत्रम् : उपसर्गाः क्रियायोगे। 1/4/59/**

वृत्तिः : प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः।

*प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप एते प्रादयः।*

**सूत्रम् : भूवादयो धातवः। 1/3/1/**

वृत्तिः : क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।

**सूत्रम् : उपसर्गादृति धातौ। 6/1/91/**

वृत्तिः : अवर्णान्तादुपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। प्रार्च्छति, उपार्च्छति।

टिप्पणी : उपसर्गात्, ऋति, धातौ इति पदच्छेदः। "आद् गुणः" इत्यस्मात् आत् इति, "वृद्धिरेचि" इत्यस्मात् वृद्धिरिति, "एकः पूर्वपरयोः" इति सूत्रं चानुवर्तते। ऋति इति सप्तम्यन्तस्य ऋकारादौ इत्यर्थः। तथा च ऋकारादौ धातौ परे इत्यर्थः। प्र ऋच्छति इत्यत्र ऋच्छति इति ऋकारादौ धातौ परे अकार + ऋकारयोः आकार एकादेशः रपरत्वं च प्रार्च्छति इति रूपम्।

**सूत्रम् : एङि पररूपम्। 6/1/94/**

वृत्तिः : आदुपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः स्यात्। प्रेजते। उपोषति।

टिप्पणी : आत्, उपसर्गात्, धातौ एतानि पदानि "एकः पूर्वपरयोः" इति सूत्रं च अनुवर्तन्ते। वृद्धेः अपवादः। प्र एजते इति स्थिते अनेन पररूपे प्रेजते इति रूपम्। एवम् उप + ओषति उपोषति इति।

**वृद्धेः अपवादः**

प्र + एजते - प्रेजते

उप + ओषति - उपोषति

**सूत्रम् : अचोऽन्त्यादि टि। 1/1/64/**

वृत्तिः : अचां मध्ये यो अन्त्यः स आदिर्यस्य तत् टिसंज्ञं स्यात्।

टिप्पणी : टिसंज्ञाविधायकमिदं सूत्रम्। हविस् इत्यत्र अचां (स्वराणां) मध्ये अन्तिमः इकारः भवति। इकारः आदित्वेनागतः वर्णसमुदायः इस् इति। अतः इस् इत्यस्य टि संज्ञा।

**टिसंज्ञा हविस् - इस्**

वार्तिकम् : शकन्ध्वादिषु पररूपं वाच्यम्। तच्च टेः। शकन्धुः, कर्कन्धुः, मनीषा। आकृतिगणोऽयम्। मार्तण्डः।

टिप्पणी : शकन्ध्वादिगणे पठितेषु शब्देषु पररूपमेव वाच्यमिति वार्तिककारः। तच्च पररूपं टेः एव। शक + अन्धुः इत्यत्र अकारात् अन्धुशब्दे परे पूर्वस्य टेः अकारस्य परस्य अकारस्य च पररूपमकारः एकादेशः शकन्धुः इति रूपम्। एवं कर्क + अन्धुः = कर्कन्धुः। शकन्ध्वादि गणे तत्रापठितानामपि शब्दानां समावेशः कर्तुं शक्यः। अतः मार्त + अण्डः - अत्रापि सवर्णदीर्घं बाधित्वा पूर्वरूपम्। आकृत्या पूर्वरूपेण गणे पाठः कल्प्येत। गणे अन्तर्भूतानां शब्दानां विहितानि कार्याणि सन्ति। समाना प्रवृत्तिः ततद्गणे अपठितानामपि शब्दानां सम्भवति। अतः प्रवृत्त्यनुसारं तादृशाः शब्दाः तत्तद्गणान्तरवर्तिशब्दवत् परिगणनीयाः। अयमेवाकृतिगणः। उदा -मार्त अण्ड इति शब्दः शकन्ध्वादि गणे न पठितः। तथापि आकृत्या शकन्ध्वादिवत् परिगणनीयः

**पररूपमेकादेशः**

**सुत्रम् : ओमाङोश्च। 6/1/95/**

वृत्तिः : ओमि आङि च ह्रस्वात् अकारात् परे पररूपमेकादेशः स्यात्।

उदाः- शिवाय ओम् नमः = शिवायों नमः। शिव + एहि (आ + इहि इत्यत्र गुणे कृते एहि इति रूपम्।) शिव एहि इत्यत्र आङ् नास्ति। अतः "ओमाङोश्च" इति सूत्रेण पररूपं न प्रवर्तेत इत्याशङ्कां दूरीकर्तुं सूत्रम्

**सूत्रम् : अन्तादिवच्च। 6/1/85/**

पूर्वपरयोः दीर्घः एकादेशः

वृत्तिः : योऽयमेकादेशः स पूर्वस्यान्तवत् परस्य आदिवत्। शिवेहि।

टिप्पणी : अन्तादिवत् च इति पदच्छेदः। अन्तश्च आदिश्च अन्तादी। अन्तादिभ्यां तुल्यम् अन्तादिवत् इति विग्रहः। एकादेशः वर्णः पूर्वस्य अन्तवत् परस्य आदिवत् च भवति इत्यर्थः। एहि इत्यत्र एकारः गुणः एकादेशः पूर्वस्याङः अन्तत्वेन ग्रहणे आङि परे पररूपम् एकारः शिवेहि इति रूपम्।

**सूत्रम् : अकः सवर्णे दीर्घः। 6/1/101**

वृत्तिः : अकः सवर्णे अचि परे पूर्वपरयोः दीर्घः एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। होतॄकारः।

पूर्वरूपमेकादेशः एचोऽयवायावः इत्यस्यापवादः

टिप्पणी : "एकः पूर्वपरयोः" इति सूत्रम्, "इको यणचि" इति सूत्रात् अचि इति चानुवर्तते। अ इ उ ऋ लृ वर्णानां प्रत्याहारः अक् इति। एभ्यः सवर्णे अचि परे पूर्वपरयोः दीर्घः एकादेशः स्यादिति सूत्रार्थः। इदमपि सूत्रम् "इको यणचि" इत्यस्यापवादः।

दैत्य + अरिः = दैत्यारिः
श्री + ईशः = श्रीशः।
विष्णु + उदयः = विष्णूदयः।

**सूत्रम् : एङः पदान्तादति। 6/1/109/**

प्रकृतिभावः वा

वृत्तिः : पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव, विष्णोऽव।

टिप्पणी : "एचोऽयवायावः" इत्यस्यापवादः। हरे अव इत्यत्र हरे इति पदान्तादेङः ह्रस्वाकारे परे पूर्वरूपमेकादेशः (एकार, अकारयोः एकार एकादेशः)। हरेव अकारस्य स्थाने (ऽ) - अनेन चिह्नेन प्रश्लेषः क्रियते। हरेऽव इति रूपम्। एवं विष्णोऽव इति।

हरे + अव - हरेऽव
विष्णो + अव - विष्णोऽव

**सूत्रम् : सर्वत्र विभाषा गोः। 6/1/122/**

वृत्तिः : लोके वेदे च एङन्तस्य गोः अति प्रकृतिभावः वा स्यात् पदान्ते। गो अग्रम्। गोऽग्रम्। पदान्ते किम् - गोः। एङन्तस्य किम्-चित्रग्वग्रम्।

टिप्पणी : एङन्तात् गो शब्दात् ह्रस्वे अकारे परे विकल्पेन प्रकृतिभावः स्यात् पदान्ते इत्यर्थः, प्रकृतिभाव इत्यनेन वर्णपरिणामाभावः विवक्षितः इत्यर्थः। गो अग्रम् इत्यत्र विकल्पेन प्रकृतिभावः तदभावे पूर्वरूपं गोऽग्रम् इति रूपम्। गो + अस् - गोः। अत्र गो इत्यस्य पदान्तत्वाभावात् न प्रकृतिभावः। चित्राः गावः (बाणाः) यस्मिन् स चित्रगुः। चित्रगु + अग्रम् अत्र गो शब्दः न ओकारान्तः। अत्र यणेव।

**सूत्रम् : अनेकाल् शित् सर्वस्य। 1/1/55/**

टिप्पणी : अनेकाल् यः आदेशः शिदादेशश्च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने स्यात्। इति प्राप्ते;

**सूत्रम् : ङिच्च। 1/1/53/**

वृत्तिः : ङित् अनेकालपि अन्त्यस्यैव स्यात्।

**सूत्रम् : अवङ् स्फोटायनस्य। 6/1/123/**

वृत्तिः : पदान्ते एङन्तस्य गोः अवङ् वाचि। गवाग्रम्, गोऽग्रम्। पदान्ते किम्, गवि।

टिप्पणी : स्फोटायनः पूर्ववैयाकरणः। अतः विकल्पार्थः लभ्यते। पदान्ते एङन्तस्य गोशब्दस्य अचि परे विकल्पेन अवङादेशः स्यात् इत्यर्थः। अवङ् इत्यत्र ङकारस्य “हलन्त्यमिति” इत्संज्ञा “तस्य लोपः” इति लोपश्च। एवम् अव इति शिष्यते। अयं च ङित् गो अग्रम् इति स्थिते ओकारस्य अवङादेशे गव अग्रम् “अकः सवर्णे दीर्घः” इति सवर्णदीर्घे गवाग्रम् इति। अवङभावे पूर्वरूपे गोऽग्रम् इति रूपम्। गो इ इति स्थिते गोशब्दस्य पदान्तत्वाभावात् अवङ् न। अत्र “एचोऽयवायावः” इति अवादेशे गवि इति रूपम्।

**सूत्रम् : इन्द्रे च। 6/1/124/**

वृत्तिः : गोरवङ् स्यात् इन्द्रे। गवेन्द्रः। नित्यार्थं सूत्रम्।

टिप्पणी : इन्द्रशब्दे परे गोशब्दस्य नित्यमवङादेशः इति सूत्रार्थः। गो + इन्द्रः इति स्थिते "इन्द्रे च" इति ओकारस्य अवङ् आदेशे गव इन्द्रः। "आद् गुणः" इति गुणे गवेन्द्रः इति रूपम्।

गो + इन्द्रः - गव इन्द्रः - इन्द्रे च
गव + इन्द्रः - गवेन्द्रः - आद् गुणः

**सूत्रम् : दूराद्धूते च। 8/2/84/**

वृत्तिः : दूरात् संबोधने वाक्यस्य टेः प्लुतो वा स्यात्।

**सूत्रम् : प्लुतप्रगृह्या अचि नित्यम्। 6/1/125/**

वृत्तिः : एते अचि प्रकृत्या स्युः।

टिप्पणी : प्लुता प्रगृह्याश्च अचि परे प्रकृत्या स्युः इत्यर्थः। आगच्छ कृष्ण (३) अत्र गौश्चरति इत्यत्र कृष्णशब्दस्य अन्तिमः अकार (टिः) दूरात् संबोधनवेलायां प्लुतो भवति। अतः नित्यं प्रकृतिभावः।

**प्रगृह्यसंज्ञा**

**सूत्रम् : ईदूदेद्द्विवचनं प्रगृह्यम्। 1/1/11/**

वृत्तिः : ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात्। हरी एतौ, विष्णू इमौ, गङ्गे अमू।

टिप्पणी : ईकारान्तम् ऊकारान्तम् एकारान्तञ्च द्विवचनं प्रगृह्यसंज्ञकम्। हरी एतौ इत्यत्र हरी इति ईकारन्तद्विवचनं, अतः प्रगृह्यम्। "प्लुतप्रगृह्या- अचि नित्य"मिति सूत्रेण नित्यं प्रकृतिभावः। हरी एतौ। एवं विष्णू इमौ, गङ्गे अमू इत्यादीनि।

**सूत्रम् : अदसो मात्। 1/1/12/**

वृत्तिः : अस्मात् परौ ईदूदौ प्रगृह्यौ स्तः।

उदाः- अमी ईशाः। रामकृष्णावमू आसाते। अदश्शब्दावयवात् मात् परौ इदूतौ प्रगृह्यौ इत्यर्थः। मकारात् परयोः ईकारऊकारयोरेव प्रगृह्यसंज्ञा। अतः अमुके अत्र इत्यत्र न। अत्र एकारः न मकारात्परः। अत्र पूर्वरूपे एकादेशे अमुकेऽत्र इति रूपम्।

**सूत्रम् : चादयोऽसत्वे । 1/4/57/**

वृत्तिः : अद्रव्यार्थाश्चादयो निपाताः स्युः।

टिप्पणी : चादयः असत्वे इति पदच्छेदः। सत्वं द्रव्यम् असत्वम् अद्रव्यम्। अद्रव्यवाचिनः चादिशब्दाः निपाताः स्युः।

**सूत्रम् : प्रादयः। 1/4/58/**

वृत्तिः : एतेऽपि तथा।

टिप्पणी : निपाताः असत्वे इति पदद्वयमप्यनुवर्तते। अद्रव्यार्थाः प्रादयः अपि निपाताः स्युः इत्यर्थः।

**सूत्रम् : निपात एकाजनाङ्। 1/1/14/**

वृत्तिः : एकोऽच् निपातः आङ्वर्जः प्रगृह्यः स्यात्। इ इन्द्रः। उ उमेशः। वाक्यस्मरणयोरङित्।

इ इन्द्र इत्यत्र इकारस्य अनेन प्रगृह्यसंज्ञायां "प्लुतप्रगृह्या"- इति नित्यं प्रकृतिभावः। एवम् उ उमेश इत्यत्रापि।

टिप्पणी : आङ् इत्यस्मिन् ङकारः इत्। अतः ङित्। तस्मादाङ् इत्यस्य न प्रगृह्यसंज्ञा। वाक्यार्थे स्मरणार्थे च आ इति अङित् एव। अतः प्रगृह्यम्। तदुक्तम् "वाक्यस्मरणयोरङित्" इति। तदुक्तं महाभाष्ये-

"ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
*एतमानं ङितं विद्याद् वाक्यस्मरणयोरङित्" इति।

आ एवं नु मन्यसे इत्यत्र वाक्यार्थद्योतकः आ इति। अतः अङित् प्रगृह्यः च। अतः नित्यं प्रकृतिभावः। एवं स्मरणार्थे आ एवं किल तत् इत्यादि।

*एतमानम् - आ इतमानम्

**सुत्रम् : ओत्। 1/1/15/**

वृत्तिः : ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः।

उदाः- अहो ईशाः। अत्र अहो इति ओदन्तनिपातस्य "ओत्" इति सूत्रेण प्रगह्यसंज्ञायां "प्लुतप्रगृह्या अचि नित्यम्" इति नित्यं प्रकृतिभावः।

**सूत्रम् : सम्बुद्धौ शाकल्यस्येतावनार्षे। 1/1/16/**

वृत्तिः : सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे। विष्णो इति। विष्ण इति। विष्णविति।

टिप्पणी : आर्षम् इत्यस्य वौदिकमित्यर्थः, अनार्षम् - अवैदिकम्, इति शब्दस्य सप्तम्येकवचने इतौ इति शाकल्यः पूर्वाचार्यः।

सम्बोधनप्रथमैकवचननिमित्तकः ओकारः विकल्पेन प्रगृह्यः स्यात्, अवैदिके इति शब्दे परे इत्यर्थः। विष्णो इति। अत्र विष्णो इति सम्बुद्धिः। तस्य विकल्पेन प्रगृह्यसंज्ञा इति लौकिकपदे परे। प्रगृह्यत्वाभावे "एचोऽयवायावः" इति अवादेशे विष्णव् इति, "लोपः शाकल्यस्य" इति वकारलोपे विष्ण इति। वकारलोपाभावे विष्णविति इति च रूपम्।

**सूत्रम् : मय उञो वो वा। 8/3/33/**

वृत्तिः : मयः परस्य उञो वो वा स्यात् अचि। किम्वुक्तम्। किमु उक्तम्।

टिप्पणी : उञ् इत्यनेन उ निपातः ग्राह्यः। किमु उक्तम् इत्यत्र मकारात् परस्य उकारस्य अचि उकारे परे विकल्पेन वकारादेशः। किम् व् उक्तम् किम्वुक्तम् इति रूपम्। वकारादेशाभावे "निपात एकाजनाङ्" इति उकारस्य प्रगृह्यसंज्ञायां "प्लुतप्रगृह्या अचि नित्यम्" इति प्रकृतिभावः किमु उक्तम् इति रूपम्।

**सूत्रम् : इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। 6/6/127/**

वृत्तिः : पदान्ता इकः ह्रस्वा वा स्युः असवर्णेऽचि परे। ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः। चक्रि अत्र। चक्र्यत्र। पदान्ता इति किम्? गौर्यौ

टिप्पणी : चक्री अत्र इत्यस्मिन् चक्री इति पदस्यान्तिमः ईकारः अत्र इति असवर्णे

अकारे परे विकल्पेन ह्रस्वो भवति। चक्रि अत्र इति रूपं ह्रस्वविधेरनन्तरं न सन्धिः। ह्रस्वाभावे "इको यणचि" इति सुत्रेण ईकारस्य यकारादेशे चक्र्यत्र इति रूपम्। गौरी औ इत्यत्र गौरी इति केवलप्रातिपदिकमेव। अतः तत्र ईकारस्य पदान्तत्वाभावात् न ह्रस्वत्वम्। किन्तु "इको यणचीति" यण्।

चक्री + अत्र - चक्रि अत्र
ह्रस्वाभावे
चक्री + अत्र - चक्र्यत्र - इको यणचि

**सूत्रम् : अचो रहाभ्यां द्वे। 8/4/46/**

वृत्तिः : अचः पराभ्यां रेफहकाराभ्यां परस्य यरः द्वे वा स्तः। गौर्य्यौ।

**यरः द्वे वा स्तः**

टिप्पणी : गौरी औ गौर्यौ इत्यत्र औकारात् परः रेफः। तस्मात् परस्य यकारस्य विकल्पेन द्वित्वम्। गौर्य्यौ इति रूपम्। द्वित्वाभावे गौर्यौ इति।

गौरी + औ - गौर्य्यौ
द्वित्वाभावे गौर्यौ इति

वार्तिकम् : "न समासे"। समासे "इकोऽसवर्णे" इत्यादिना विहितं ह्रस्वत्वं नेत्यर्थः। तेन तत्र "इको यणची"ति यणेव। वाप्यश्व इत्येकमेव रूपम्। वाप्यामश्व इति विग्रहः।

**सूत्रम् : ऋत्यकः। 6/1/128/**

वृत्तिः : ऋति परे पदान्ताः अकः ह्रस्वा वा स्युः। ब्रह्म ऋषि, ब्रह्मर्षिः।

टिप्पणी : ह्रस्वे ऋकारे परे पदान्तस्य अकः विकल्पेन ह्रस्वत्वम्। ब्रह्मा ऋषि इत्यत्र आकारात् ह्रस्वे ऋकारे परे विकल्पेन ह्रस्वे ब्रह्म ऋषि इति। ह्रस्वत्वाभावे "आद् गुणः" इति गुणे रपरत्वे ब्रह्मर्षिः इति रूपम्। पदान्तस्य अकः इत्युक्तत्वात् आ ऋच्छत् इत्यत्र ह्रस्वत्वं न। "आटश्च" इति वृद्धौ रपरत्वे आर्च्छत् इत्येव रूपम्।

इति अच्सन्धिप्रकरणम्।



# पठनप्रवर्तनानि

♦ **उचितसूत्रसाहाय्येन पदानि सन्धत्त।**

| | सन्धियुक्तं पदम् | सूत्रम् |
|---|---|---|
| क. देव + ऐश्वर्यम् | | |
| ख. श्री+ ईशः | | |
| ग. प्र + एजते | | |
| ध. गो + अग्रम् | | |

♦ **अधोलिखितेषु सूत्रेषु संज्ञाविधायकसूत्राणि चित्वा लिखत।**

वृद्धिरादैच्, संयोगान्तस्य लोपः। अचोन्त्यादि टि। वद्धिरेचि। अदेङ्गुणः। उपसर्गाः क्रियायोगे। अवङ् स्फोटायनस्य, पूर्वत्रासिद्धम्।

♦ **प्रदत्तेषु सूत्रेषु प्रकृतिभावविधायकानि सूत्राणि कानि ?**

सर्वत्र विभाषा गोः, प्रादयः, प्लुतप्रगृह्या अचि नित्यम्, तपरस्तत्कालस्य।

- **उत्तराणि लिखत।**

    क. सुद्ध्युपास्यः इत्यत्र यणादेशः केन सूत्रेण विधीयते?

    ख. धातुसंज्ञा केन सूत्रेण विहिता?

    ग. दैत्यारिः इत्यत्र सवर्णदीर्घविधायकं सूत्रं किम्?

    ध विष्णू इति पदस्य प्रगृह्यसंज्ञा कथम्?

- **'सुद्ध्युपास्यः' - प्रक्रियानुसारं विशदयत।**

- **यथोचितं योजयत।**

| | | | |
|---|---|---|---|
| **क.** | नायकः | ब्रह्म ऋषिः | वृद्धिसंज्ञा |
| **ख.** | ऋत्यकः | आयादेशः | ह्रस्वः प्रकृतिभावः च |
| **ग.** | आ ऐ औ | वृद्धिरादैच् | आ उ औ |
| **घ.** | गङ्गा + उदकम् | ओत् | एचोयवायावः |
| **ङ** | प्रगृह्यम् | आद्गुणः | अहो ईशः |

- **काव्यादिभ्यो सञ्चितानि अच्सन्धिरूपाणि सूत्रसाहाय्येन समर्थयत।**

## पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रमठ संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | परिहारनिर्देशः |
|---|---|---|---|---|
| 1. | उचितसूत्रसाहाय्येन पदानि सन्धतानि। | | | |
| 2. | संज्ञाविधायकसूत्राणि चितानि। | | | |
| 3. | प्रकृतिभावविधायकानि सूत्राणि चितानि? | | | |
| 4. | उत्तराणि लिखितानि। | | | |
| 5. | यथोचितं योजितानि। | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संख्यया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# पठनाधिगमाः

- आमुखम् अवतारयति। प्रत्याहारान् ज्ञात्वा सूत्राणि व्याख्याति।
- उदाहरणेन सह सन्धिनियमान् विशदयति।
- सूत्रानुसारं पदानिं सन्धत्ते विश्लेषयति च।
- अयादिसन्धिं विशदीकरोति।
- सूत्राणां वृत्तिं विशदीकरोति लिखति च।
- गुणसंज्ञां विशदयति गुणसन्धिं विशदयति, सूत्रं व्याचष्टे, पदानि विघटयति, नूतनोदाहरणे प्रयुङ्क्ते च।
- वृद्धिसंज्ञां लिखति, वृद्धिम् उदाहरणे प्रयुङ्क्ते।
- उपसर्गसंज्ञा, टिसंज्ञा, धातुसंज्ञा, प्रगृह्यसंज्ञा इत्यादिसंज्ञाः विविच्य पठति लिखति सन्दर्भानुसारं प्रयुङ्क्ते च।
- सन्धिनियमान् ज्ञात्वा पदसन्धानं विघटनं च विशदयति।
- यण् सन्धि, अयादिसन्धि, गुणसन्धि, वृद्धिसन्धि, पूर्वरूपसन्धि इत्यादीन् परिचिनोति, प्रयुङ्क्ते च।

# ३ अथ हल्सन्धिप्रकरणम्।

**सूत्रम् : स्तोः श्चुना श्चुः। 8/4/40/**

| | | | | | |
|---|---|---|---|---|---|
| स | त | थ | द | ध | न |
| | | + | | | |
| श | च | छ | ज | झ | ञ |
| | | - | | | |
| श | च | छ | ज | झ | ञ |

वृत्तिः : सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। रामश्शेते, रामश्चिनोति, सच्चित्। शार्ङ्गिञ्जय।

टिप्पणी : स् च तुश्च अनयोः समाहारः स्तुः। तस्य सकारतवर्गयोः इत्यर्थः। श् च चुश्च श्चुः। तेन। योगे इत्याध्याह्रियते।

स्तोः इति स्थानी श्चुः इति आदेशश्च। अतः स्थान्यादेशयोः यथासंख्यं भवेत्। एवं सकारस्य शकारः तवर्गस्य चवर्गश्च आदेशः। उदाहरणं स्पष्टम् -

रामस् + शेते - रामश्शेते। रामस् + चिनोति रामश्चिनोति।
सत् + चित् - सच्चित्। शार्ङ्गिन् + जय - शार्ङ्गिञ्जय।

**सूत्रम् : शात्। 8/4/44/**

वृत्तिः : शात् परस्य तवर्गस्य श्चुत्वं न स्यात्। विश्नः। प्रश्नः।

**श्चुत्वनिषेधः**

टिप्पणी : श्चुत्वनिषेधकमिदं सूत्रम्। उदाहरणम् - प्रश् + नः इति स्थिते "स्तोः श्चुना श्चुः" इति सूत्रेण नकारस्य चवर्गादेशे (ञकारादेशे) प्राप्ते तन्निषेधः अनेन क्रियते। प्रश्नः। एवं विश् + नः।

**सूत्रम् : ष्टुना ष्टुः। 8/4/41/**

वृत्तिः : स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः, रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे। अत्रापि स्थान्यादेशयोर्यथासंख्यम्।

| | | | | | |
|---|---|---|---|---|---|
| स | त | थ | द | ध | न |
| | | + | | | |
| ष | ट | ठ | ड | ढ | ण |
| | | - | | | |
| ष | ट | ठ | ड | ढ | ण |

टिप्पणी : उदाः- रामस् षष्ठः, अनेन ष्टुत्वे रामष्षष्ठः। एवम् रामः टीकते रामस् टीकते रामष्टीकते। पेष् + ता इति स्थिते षकारयोगे तकारस्य टवर्गादेशे पेष्टा।

पेष् + ता - पेष्टा
रामस् + षष्ठः - रामष्षष्ठः
रामस् + टीकते - रामष्टीकते।

**सूत्रम् : न पदान्ताट्टोरनाम्। 8/4/42/**

वृत्तिः : पदान्तात् टवर्गात् परस्य अनामः स्तोः ष्टुः न स्यात्। षट्सन्तः। षट्ते। पदान्तात् किम्? इट्टे। टोः किम्? सर्पिष्टमम्।

टिप्पणी : पदान्तात् टवर्गात् परयोः नाम्भिन्नयोः सकारतवर्गयोः षकारटवर्गौ न स्तः इति सूत्रार्थः। षट् इति पदम्। तदन्तस्य टवर्गस्य सकारयोगे ष्टुत्वं न षट्सन्तः इत्येव रूपम्। पदान्तात् इत्यनुक्ते ईट् ते इत्यत्रापि निषेधः स्यात्। ईट् इति न पदं किन्तु धातुः। अतः अत्र "ष्टुना ष्टुः" इति ष्टुत्वे ईट्टे इति रूपम्। सर्पिष् तमम् इत्यत्र ष्टुत्वमिष्टम्। अतः टोः इत्युक्तम्।। षकारः टवर्गे नान्तर्भावितः।

**ष्टुत्वनिषेधः**

षट् + सन्तः - षट्सन्तः
षट् + ते - षट्ते

**वार्तिकम्** : अनाम्नवतिनगरीणामिति वाच्यम्।। नाम् नवति नगरी एतेषां ष्टुत्वनिषेधो नास्ति। षट् नाम् षण्णाम्, षट् नवतिः षण्णवतिः, षट् नगर्यः षण्णगर्यः।

**ष्टुत्वनिषेधो नास्ति।**

षट् + नाम् - षण्णाम्
षट् + नवतिः - षण्णवतिः
षट् + नगर्यः - षण्णगर्यः।

**सूत्रम् : तोः षि। 8/4/43/**

वृत्तिः : तवर्गस्य षकारे परे ष्टुत्वं न।

उदाः- सन् षष्ठः। अत्र तवर्गस्थनकारस्य षकारे परे "ष्टुना ष्टुः" इति सूत्रेण प्राप्तं ष्टुत्वं निषिध्यते अनेन सूत्रेण।

**ष्टुत्वं न।**

**सूत्रम् : झलां जशोऽन्ते । 8/2/39/**

वृत्तिः : पदान्ते झलां जशः स्युः।

टिप्पणी : झल् प्रत्याहारः झभञ् सूत्रस्थझकारात् आरभ्य हल् सूत्रस्थलकारपर्यन्तः। जश् इति जबगडदश् अथवा वर्गतृतीयाक्षराणि।

उदाः- वाक् ईशः = वागीशः। अत्र वाक् इति पदस्य अन्ते विद्यमानस्य झल्प्रत्याहारस्थककारस्य वर्गतृतीयादेशः। एवं वाग्विलासः इत्यादीन्युदाहरणानि।

वाक् + ईशः - वागीशः।
वाक् + विलासः - वाग्विलासः

**सूत्रम् : यरोऽनुनासिकेऽनुनासिको वा। 8/4/45/**

वृत्तिः : यरः पदान्तस्य अनुनासिके परे अनुनासिको वा स्यात्। एतन्मुरारिः एतद् मुरारिः।

टिप्पणी : हकारभिन्नानि व्यञ्जनानि यर् प्रत्याहारेऽन्तर्भवन्ति। पदान्तस्य यरः विकल्पेन अनुनासिकः स्यात् अनुनासिके परे इति सूत्रार्थः।

एतद् मुरारिः इत्यत्र एतद् इति पदस्यान्तिमस्य दकारस्य मुरारिः इति पदस्थमकारे परे अनुनासिकः वा स्यात् दकारस्यानुनासिकः वर्गपञ्चमः नकारः। एतन्मुरारिः इति। आदेशाभावे एतद् मुरारिः इत्यपि। एवं दिग् + मुखम् दिङ्मुखम्, षट् + मुखः षण्मुखः। अप् + मयम् अम्मयम् इत्यादीन्यपि।

एतद् + मुरारिः - एतन्मुरारिः।
दिग् + मुखम् - दिङ्मुखम्।
षट् + मुखः - षण्मुखः।
अप् + मयम् - अम्मयम्।

**वार्तिकम् -** प्रत्यये भाषायां नित्यम्।

टिप्पणी : अनुनासिकादौ प्रत्यये परे लौकिकभाषायाम् अनुनासिकादेशः नित्यम् इति अनेन वार्त्तिकेन प्रतिपाद्यते।

उदाः- तद् मात्रम् अत्र मात्रच् प्रत्ययः। अतः नित्यमनुनासिकादेशे तन्मात्रम् इति। चित् + मयम् अत्र मयट् प्रत्ययः अतः नित्यमनुनासिकादेशे चिन्मयम् इति रूपम्।।

**सूत्रम् : तोर्लि। 8/4/60/**

वृत्तिः : तवर्गस्य लकारे परे परसवर्णः स्यात्। तल्लयः। नस्यानुनासिको लः। विद्वाँल्लिखति।

**परसवर्णः।**

उदाः- तद् + लयः अत्र लकारे परे दकारस्य परसवर्णः लकारः एव। अतः तल्लयः इति रूपम्। एवम् - मरुत् + लोलिता = मरुल्लोलिता, इत्यादि। विद्वान्+लिखति इत्यत्र नकारः तवर्गस्थानुनासिकः। तस्य परसवर्णः अनुनासिकः लकारः एव। "अनुनासिकत्वाननुनासिकत्वाभ्यां भेदेन यवला द्विधा" इति पूर्वं पठितम्। विद्वाँल्लिखति इति रूपम्।

तद् + लयः - तल्लयः।
मरुत् + लोलिता - मरुल्लोलिता।
विद्वान्+ लिखति - विद्वाँल्लिखति।

**पूर्वसवर्णः।**

**सूत्रम् : उदः स्थास्तम्भोः पूर्वस्य। 8/4/61/**

वृत्तिः : उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्।

टिप्पणी : उद् इत्यस्य पञ्चमीविभक्तौ उदः इति रूपम्। अतः "तस्मादित्युत्तरस्य" इति परिभाषासूत्रेण परस्य इत्यर्थः। ननु उद् अस्थात् इत्यत्र पूर्वसवर्णः कथं न भवति इति चेत् उच्यते -

**सूत्रम् : तस्मादित्युत्तरस्य । 1/1/67/**

वृत्तिः : पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य बोध्यम्। एवम् अस्थात् इत्यत्र अवर्णेन व्यवधानमस्ति इत्यतः न पूर्वसवर्णः।

उद् + स्थानम् इति स्थिते पूर्वसवर्णः कस्य इति शङ्कां परिहर्तुम् सूत्रम् -

**सूत्रम् : आदेः परस्य। 1/1/53/**

वृत्तिः : परस्य यद्विहितं तत् तस्यादेः बोध्यम्। एवं बाह्यप्रयत्नसाम्येन सकारस्य पूर्वसवर्णः सिध्यति। महाप्राणविवारश्वासाघोषस्य सकारस्य तादृशः थकारः एव पूर्वसवर्णः। अतः उद् थ्थानम् इति जाते;

उद् + स्थानम् - उद् थ्थानम्

**सूत्रम् : झरो झरि सवर्णे। 8/4/65/**

वृत्तिः : हलः परस्य झरो लोपो वा स्यात् सवर्णे झरि।

उद् इति हलः परस्य थकारस्य सवर्णे थकारे परे लोपः विकल्पेन स्यात्। उद्थानम्।

**सूत्रम् : खरि च। 8/4/55/**

वृत्तिः : खरि झलां चरः स्युः इति उदः दस्य तः उत्थानम्, एवम् उत्थम्भनम् इति। उद् स्थितिः उत्थितिः। उद् स्थास्यति उत्थास्यति। उद् + स्तम्भनम् - उत्थम्भनम्।

**सूत्रम् : झयो होऽन्यतरस्याम्। 8/4/62/**

पूर्वसवर्णः।

वृत्तिः : झयः परस्य हस्य वा पूर्वसवर्णः। नादस्य, घोषस्य, संवारस्य, महाप्राणस्य तादृशो वर्गचतुर्थः आदेशः।

टिप्पणी : झयः इति पञ्चमी। तस्मात् झयः परस्य इत्यर्थः। हः इति षष्ठी। एवं झयः परस्य हस्य विकल्पेन पूर्वसवर्णः इत्यर्थः। हकारस्य पूर्वसवर्णः बाह्यप्रयत्नसाम्यमनुसृत्यैव भवतीत्याशयः।

उदाः- वाग् हरिः। अत्र ग् इति झयः परस्य हकारस्य पूर्वसवर्णे वर्गचतुर्थादेशे वाग्घरिः इति, पूर्वसवर्णाभावे वाग्हरिः इत्यपि रूपम्।

**सूत्रम् : शश्छोऽटि। 8/4/63/**

वृत्तिः : पदान्तात् झयः परस्य शस्य छो वा स्यात् अटि। तच्छिवः, तच्शिवः।

टिप्पणी : शः छः अटि इति पदच्छेदः। झयः, पदान्तात् वा इति पदत्रयम् अनुवर्तनीयम्। शः इति षष्ठी, छः इति प्रथमा। एवं पदान्तात् झयः परस्य शकारस्य छकारः विकल्पेन स्यात् अटि परे इत्यर्थः।

तद् शिवः इत्यत्र दस्य “स्तोः श्चुना श्चुः” इति श्चुत्वे जकारादेशे “खरि च” इति जकारस्य चर्त्वे तच् शिवः, अनेन छकारे तच्छिवः इति रूपम्।

तद् + शिवः -
तज् + शिवः - स्तोः श्चुना श्चुः
तज् + शिवः - तच्+ शिवः - खरि च
तच्+ शिवः - तच्छिवः शश्छोऽटि

वार्तिकम् : छत्वममीति वाच्यम्। तत् श्लोकेन तच्छ्लोकेन।

अम् इति प्रत्याहारः। शकरात् परः लकार न अट् किन्तु अम्। अतः अनेन वार्तिकेन छकारादेशे तच्छ्लोकेन इति रूपम्।।

**सूत्रम् : मोऽनुस्वारः। 8/3/23/**

वृत्तिः : मान्तस्य पदस्य अनुस्वारः स्यात् हलि। हरिं वन्दे।

टिप्पणीः हरिम् वन्दे इति स्थिते हरिम् इति मकारान्तस्य पदस्य व्यञ्जने वकारे परे अनुस्वारादेशः। हरिं वन्दे इति रूपम्।।

**सूत्रम् : नश्चाऽपदान्तस्य झलि। 8/3/24/**

वृत्तिः : नस्य मस्य च अपदान्तस्य झलि अनुस्वारः। आक्रंस्यते यशांसि।

झलि किम् - नम्यते, मन्यते।

टिप्पणी : (यशान् + सि) आक्रम् स्यते आक्रंस्यते। मन्यते नम्यते इत्यादिस्थले परतया झलोऽभावात् नानुस्वारः।

**सूत्रम् : अनुस्वारस्य ययि परसवर्णः । 8/4/58/**

वृत्तिः : अनुस्वारस्य ययि परे परसवर्णः स्यात्। शान्तः।

टिप्पणी : शाम् तः इति स्थिते तकारः झल् भवति इत्यतः "नश्चाऽपदान्तस्य झलि" इति सूत्रेण मकारस्यानुस्वारः शांतः इति जाते अनेन सूत्रेण अनुस्वरस्य परसवर्णः नकारः एव। शान्तः इति रूपम्। नित्यविधिरयम्।

**सूत्रम् : वा पदान्तस्य। 8/4/59/**

वृत्तिः : पदान्तस्य अनुस्वारस्य ययि परे परसवर्णो वा स्यात्।

टिप्पणी : त्वम् करोषि इत्यत्र "मोऽनुस्वारः" इति मकारस्य अनुस्वारे त्वं करोषि। अनेन विकल्पेन परसवर्णे त्वङ्करोषि इति रूपम्। परसवर्णाभावे त्वं करोषि इत्येव रूपम्। एवम् अलङ्कारः, अलंकारः इत्याद्यपि बोध्यम्।

**सूत्रम् : मो राजि समः क्वौ। 8/3/25/**

वृत्तिः : क्विबन्ते राजतौ परे समो मस्य म एव स्यात्।

टिप्पणी : क्विप् प्रत्ययः एव क्वि इत्यनेन गृह्यते। तस्य सप्तम्यां क्वौ इति रूपम्। प्रत्ययग्रहणे तदन्तग्रहणं इति परिभाषया क्विपप्रत्ययान्तः इति सिद्ध्यति। क्विबन्ते राज् धातौ परे सम् शब्दस्य मकारस्य मकार एव स्यात् न त्वनुस्वारः इति अर्थः।

सम् राट् = सम्राट् इति रूपम्।

**सूत्रम् : हे मपरे वा। 8/3/26/**

वृत्तिः : मपरे हकारे परे मस्य मो वा स्यात्। किम् ह्मलयति, किं ह्मलयति इति रूपद्वयम्।।

**वार्तिकम्** - यवलपरे यवला वा।

यवलपरे हकारे परे (ह्य, ह्व, ह्ल एषु पेरषु) मकारस्य यथाक्रमं य् व् ल् एते विकल्पेन स्युः कियँ ह्यः, किं ह्यः, किँव् ह्वलयति, किं ह्वलयति। किँल् ह्लादयति, किं ह्लादयति इत्यादीन्युदाहरणानि मकारस्य स्थाने अनुनासिकाः यवलाः।

**सूत्रम् : आद्यन्तौ टकितौ। 1/1/46/**

वृत्तिः : टित्कितौ यस्योक्तौ तस्य क्रमात् आद्यन्तावयवौ स्तः। टित् आद्यावयवः कित् अन्तावयवः च भवतः इत्यर्थः।

टिप्पणी : प्राङ् + षष्ठः इत्यत्र शरि (षकारे परे) ङकारस्य " ङ्णोः कुक्टुक्शरि" इति सूत्रेण विहितः कुक् आगमः कित्वात् "आद्यन्तौ टकितौ" इति सूत्रेण अन्त्यावयवे प्राङ्क्षष्ठः प्राङ्क्षष्ठः। एवं सुगण् षष्ठः इत्यत्र टुकागमे सुगण्ट्षष्ठः इति।

**वार्तिकम्** - चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्।

टिप्पणी : शरि परे चयः वर्गद्वितीयादेशः भवेत् पौष्करसादेः आचार्यस्य मते।

प्राङ्ख्षष्ठः, प्राङ्क्षष्ठः प्राङ्षष्ठः। सुगणठ्षष्ठः, सुगण्ट् षष्ठः, सुगण्षष्ठः।

**सूत्रम् : डः सि धुट्। 8/3/29/**

वृत्तिः : डात् परस्य सस्य धुट् वा स्यात्। षट्त् सन्तः, षट्सन्तः।

टिप्पणीः डः इति पञ्चमी। सि इति सप्तमी। उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इति नियमेन डः इति पञ्चमीनिर्देशस्य प्राबल्यम्। अतः डात् परस्य इत्यर्थः। एवं परस्य इति षष्ठ्या सह अन्वेतुं सप्तम्यन्तं षष्ठ्यन्तं कृत्वा सि इत्यस्य सस्य इत्यर्थः। वा इति अनुवर्तते। डकारात् परस्य सकारस्य विकल्पेन धुडागमः इति सूत्रार्थः। धुट् इत्यस्य टकारस्य, "हलन्त्यम्" इत्यनेन इत्संज्ञा, उकारस्य

"उपदेशे अजनुनासिकः इत्" इति सूत्रेण इत्संज्ञा लोपश्च ध् इति शिष्यते। टित्त्वादाद्यावयवो भवति, षड् सन्तः इति स्थिते धुडागमे षड्ध्सन्तः। "खरि च" इति सूत्रेण धकारस्य चर्त्वे तकारे षड्त् सन्तः। पुनः "खरि च" इति सूत्रेण डकारस्य चर्त्वे टकारे षट्त्सन्तः। "न पदान्ताट्टोरनाम्" इति निषेधात् पुनः ष्टुत्वं न। धुडागमाभावे "खरि च" इति डकारस्य चर्त्वे टकारे षट्सन्तः।।

षड् + सन्तः - षड्ध्सन्तः - धुडागमः

षड्त् - सन्तः - खरि च - धकारस्य चर्त्वे

षट्त् - सन्तः - खरि च - डकारस्य टकारे

**सूत्रम् : नश्च। 8/3/30/**

वृत्तिः : नान्तात् पदात् परस्य सस्य धुट् वा स्यात्। सन्त् सः। सन् सः।

टिप्पणी : नान्तात् पदात् परस्य सकारस्य विकल्पेन धुडागमः स्यादित्यर्थः। सन् + सः इत्यत्र सन् इति नान्तात् पदात् परस्य सकारस्य आद्यावयवे धुडागमे "खरि च" इति चर्त्वे स न् त् सः इति रूपम्। धुटागमाभावे सन्सः इत्येव रूपम्। एवम् अभवन्सर्वे अभवन्त् सर्वे इत्यपि।

**सूत्रम् : शि तुक्। 8/3/31/**

वृत्तिः : पदान्तस्य नस्य शे परे तुग्वा स्यात्। सञ्छम्भुः। सञ्च्छम्भुः। सञ्च्शम्भुः। सञ्शम्भुः।

टिप्पणी : नकारान्तस्य पदस्य शकारे परे विकल्पेन तुगागमः इति सूत्रार्थः। तुकः कित्वाद् अन्त्यावयवो भवति। सन् शम्भुः इत्यत्र अनेन सूत्रेण तुगागमो वा। अन्त्यावयवे सन्त्शम्भुः। शकारयोगे तकारस्य श्चुत्वे चकारे पुनः चकारयोगे नकारस्य श्चुत्वे ञकारे सञ्च्शम्भुः। "शश्छोऽटि" इति सूत्रेण पदान्तात् चकारात् परस्य शकारस्य विकल्पेन छत्वे सञ्च्छम्भुः। "झरो झरि सवर्णे" इति सूत्रेण चकारस्य विकल्पेन लोपः, सञ्छम्भुः। चकारलोपाभावे सञ्च्छम्भुः, छत्वाभावे सञ्च्शम्भुः। तुगागमाभावे नकारस्य श्चुत्वेन ञकारे सञ्शम्भुः इति चत्वारि रूपाणि। तदुक्तम् -

"अछौ अचछा, अचशा, अशाविति चतुष्टयम्।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात्"।। एवं पठन् शेते।

इत्यत्रापि रूपाणि योजनीयानि।

सन् + शम्भुः - सन्त्शम्भुः - शि तुक्।
सन्च्शम्भुः - स्तोः श्चुना श्चुः
सञ्च्शम्भुः - स्तोः श्चुना श्चुः
सञ्च्शम्भुः (१)
सञ्च्छम्भुः - शश्छोऽटि। (२)
सञ्छम्भुः - झरो झरि सवर्णे। - चकारस्य विकल्पेन लोपः (३)
छत्वाभावे - सञ्च्शम्भुः
तुगागमाभावे - सञ्शम्भुः (४)

**सूत्रम् : ङमो ह्रस्वादचि ङमुण् नित्यम्। 8/3/32/**

वृत्तिः : ह्रस्वात् परो यो ङम् तदन्तं यत् पदं तस्मात् परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः।

टिप्पणी : ङम् इति वर्णत्रयात्मकः प्रत्याहारः ङणन इति ह्रस्वात् इति ङमः इत्यस्य विशेषणम्। ङमुटि उकारः टकारश्च इतौ। ङम् इति शिष्यते, सोऽपि ङण, न एतेषां प्रत्याहारः। एवं ङुडागमः णुडागमः नुडागमः च इत्यर्थः। प्रत्यङ् आत्मा इति स्थिते, ह्रस्वादकारात् परस्य ङकारस्य अकारे परे ङुडागमः टित्त्वादाद्यावयवे प्रत्यङ्ङ्आत्मा = प्रत्यङ्ङात्मा इति रूपम्। सुगण् ईशः इति स्थिते ह्रस्वादकारात् परस्य णकारस्य अचि (ईकारे) परे णुडागमः। टित्त्वादाद्यावयवे सुगण्ण् ईशः = सुगण्णीशः। सन् + अच्युतः इत्यत्र नकारस्य नुटागमः आद्यावयवे - सन्न्अच्युतः सन्नच्युतः इति रूपम्। महान् + आत्मा इत्यत्र नकारः दीर्घात् परः। अतो न नुडागमः। ज्वलन्निव, तस्मिन्नवसरे, गच्छन्नसौ, एतस्मिन्नन्तरे इत्यादीनि उदाहरणान्तराणि द्रष्टव्यानि। सूत्रे नित्यमिति आभीक्ष्ण्यार्थे ग्राह्यम्। प्रायः इत्यर्थः। ङमुडागमरहितान्यपि रूपाणि सन्ति। "इको यणचि" इत्यादिषु आचार्येणैव ङमुडागमः न कृतः।

**सूत्रम् : समः सुटि। 8/3/5/**

वृत्तिः : समो रुः स्यात् सुटि।

टिप्पणि : रुः इति अनुवर्तते। सुटि परे समः रुः स्यात् इत्यर्थः। रुः इत्यस्य उकारः इत्, र् इति शिष्यते।

उदाः- सम् + स्कर्ता। अत्र कृञ् धातोः "भूषणार्थे सुट्" इति सकारः। तस्मिन् परे समः मकारस्य रुः आदेशः सर् + स्कर्ता इति जातम्।

**सूत्रम् : अत्रानुनासिकः पूर्वस्य तु वा। 8/3/2/**

वृत्तिः : अत्र रुप्रकरणे रोः पूर्वस्य अनुनासिको वा स्यात्।
सँरस्कर्ता।

**सूत्रम् : अनुनासिकात्परोऽनुस्वारः। 8/4/34/**

वृत्तिः : अनुनासिकं विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात्।

टिप्पणी : अनुनासिकात् इति ल्यब्लोपे पञ्चमी। अनुनासिकं विहायेत्यर्थः। अनुनासिकाभावपक्षे इति यावत्। अनुनासिकाभावे रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात् इत्यर्थः।
संर् स्कर्ता इति रूपम्।

**सूत्रम् : खरवसानयोर्विसर्जनीयः। 1/83/15/**

वृत्तिः : खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्।
सं स्कर्ता।

**वार्तिकम्-** संपुंकानां सो वक्तव्यः। सँस्स्कर्ता, संस्स्कर्ता। समः विसर्गस्य सकारः।

**सूत्रम् : पुमः खय्यम्परे। 8/3/6/**

वृत्तिः : अम् परे खयि पुमो रुः स्यात्। पुँस्कोकिलः, पुंस्कोकिलः।

टिप्पणी : अम् प्रत्याहारः। पुम् शब्दस्य रुः स्यात् अम् परे खयि इत्यर्थः। अम् परः यस्मात् सः अम्परः, खय् प्रत्याहारः। वर्गप्रथमद्वितीयाः वर्णाः।

उदा :- पुम् + कोकिलः। अत्र को इति अम्परः खय् भवति। अतः पुमः मकारस्य रुः पुर् कोकिलः, "अत्रानुनासिकः पुर्वस्य तु वा" इति सूत्रेण रोः पूर्वस्य उकारस्य विकल्पेन अनुनासिकागमः पुँर्कोकिलः। अनुनासिकाभावे "अनुनासिकात् परोऽनुस्वारः" इति अनुस्वारागमः पुंर् कोकिलः, "खरवसानयोर्विसर्जनीयः" इति सूत्रेण उभयत्रापि रेफस्य विसर्गः। "संपुंका नां सो वक्तव्यः" इति वार्तिकेन पुमः विसर्गस्य सकारः पुँस्कोकिलः, पुंस्कोकिलः।

**सूत्रम् : नश्छव्यप्रशान्। 8/3/7/**

वृत्तिः : अम् परे छवि नान्तस्य पदस्य रुः स्यात्, न तु प्रशान् शब्दस्य।

टिप्पणी : अप्रशान् इति लुप्तषष्ठीकं पदम्। अप्रशानः इत्यर्थः, न प्रशान् अप्रशान्। नकारान्तस्य पदस्य रुः स्यात् अम्परे छवि न तु प्रशान् शब्दस्य इति सूत्रार्थः।

चक्रिन् + त्रायस्व इत्यत्र चक्रिन् इति नान्तं पदम्। त्र इति अम् परः छव्। अतः अनेन सूत्रेण नकारस्य रुत्वे चक्रिर् त्रायस्व। ततः "अत्रानुनासिकःपूर्वस्य तु वा" इति सूत्रेण क्रि इत्यस्य इकारस्य अनुनासिकादेशः चक्रिँर् त्रायस्व। अनुनासिकाभावे "अनुनासिकात्परोऽनुस्वारः" इति अनुस्वारागमः चक्रिंर् त्रायस्व। उभयत्रापि "खरवसानयोर्विसर्जनीयः" इति रेफस्य विसर्गः चक्रिँः त्रायस्व, चक्रिंः त्रायस्व इति जाते;

**सूत्रम् : विसर्जनीयस्य सः । 8/3/34/**

वृत्तिः : खरि विसर्जनीयस्य सः स्यात्।

चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व। अप्रशान् किम्? - प्रशान्तनोति। पदान्तस्य किम्? हन्ति।

टिप्पणी : अनुनासिकात् इति ल्यब्लोपे पञ्चमी। अनुनासिकं विहायेत्यर्थः। अनुनासिकाभावपक्षे इति यावत्। अनुनासिकाभावे रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात् इत्यर्थः।

**सूत्रम् : कुप्वोः ≍ क ≍ पौ च। 8/3/37/**

वृत्तिः : कवर्गे पवर्गे च परे विसर्गस्य ≍ क ≍ पौ स्तः। चाद्विसर्गः। नॄँ ≍ पाहि, नॄँः पाहि, नॄं ≍ पाहि नॄंः पाहि, नॄन् पाहि। एवं पञ्चरूपाणि।

**सूत्रम् : तस्य परमाम्रेडितम्। 8/1/2/**

वृत्तिः : द्विरुक्तस्य परं रूपमाम्रेडितं स्यात्।

टिप्पणी : तस्य इत्यनेन "सर्वस्य द्वे" इति सूत्रेण विहितं द्विरुक्तं परामृष्टम्। तस्येत्यवयवषष्ठी। व्याकरणशास्त्रे द्विरुक्तस्य परं रूपम् आम्रेडितं स्यादिति सूत्रार्थः।

**आम्रेडितम्।**

**सूत्रम् : कानाम्रेडिते। 8/3/92/**

वृत्तिः : कान् नकारस्य रुः स्याद् आम्रेडिते। काँस्कान्, कांस्कान्।

टिप्पणी : कानिति किं शब्दस्य पुंल्लिङ्गे द्वितीयाबहुवचने रूपम्। कानिति लुप्तषष्ठीकं पदम्। कान् इति शब्दस्य नकारस्येति भावः। कान् + कान् - इत्यत्र प्रथमस्य कान् इत्यस्य नकारस्य कान् इति आम्रेडिते परे रुः स्यात् कार् + कान्। रोः पूर्वस्य आकारस्य विकल्पेन अनुनासिकः, काँर् कान्, अनुनासिकाभावे अनुस्वारागमः कांर् कान्। पदान्तरेफस्य विसर्गः "कुप्वोः ≍ क ≍ पौ च" इति जिह्वामूलीयं बाधित्वा "संपुंकानां सो वक्तव्यः" इति कानः विसर्गस्य सकारः, काँस्कान्, कांस्कान् इति रूपद्वयम्।

**सूत्रम् : छे च। 6/1/73/**

वृत्तिः : ह्रस्वस्य छे परे तुगागमः स्यात्। शिवच्छाया।

टिप्पणी : तुगागमः कित्वाद् अन्त्यावयवः। शिव छाया इत्यत्र तुगागमे इतो लोपे शिवत् छाया, "झलां जशोऽन्ते" "इति जश्त्वं शिवद् छाया, "स्तोः श्चुना श्चुः " इति श्चुत्वे शिवज्च्छाया, ततः, "खरि च" इति सूत्रेण चर्त्वे शिवच्छाया, शिवच्छाया इति रूपम्।

शिवत् छाया झलां जशोऽन्ते
शिवद्छाया - स्तोः श्चुना श्चुः
शिवज् छाया - खरि च
शिवच्छाया - शिवच्छाया

**सूत्रम् : पदान्ताद्वा। 6/1/76/**

वृत्तिः : दीर्घात् पदान्तात् छे परे तुग्वा स्यात्। लक्ष्मीच्छाया। लक्ष्मीछाया।

टिप्पणी : दीर्घस्यायं तुक्। लक्ष्मी छाया इत्यत्र पदान्तात् दीर्घस्य छकारे परे विकल्पेन तुगागमः। कित्वात् अन्त्यावयवे लक्ष्मीत् छाया। जश्त्वे श्चुत्वे चर्त्वे लक्ष्मीच्छाया। तुगभावे लक्ष्मीछाया।।

इति हल्सन्धिप्रकरणम्।



## पठनप्रवर्तनानि

♦ **यथोचितं योजयत।**

| | | |
|---|---|---|
| **क.** सच्चित् | जश्त्वम् | अनुनासिकादेशः |
| **ख.** वागीशः | प्रत्यये भाषायां नित्यम् | झलां जशोऽन्ते |
| **ग.** चिन्मयम् | स्तोः श्चुना श्चुः | श्चुत्वम् |

♦ **सन्धिनिष्पत्तिं सूत्रसहाय्येन समर्थयितुं कश्चन छात्रः अधः प्रदत्तरीत्या अलिखत्। तत्र स्खालित्यमस्ति चेत् शोधयतु।**

| | | | |
|---|---|---|---|
| **क.** | तद् शिवः | तज् शिवः | (खरि च) |
| | तज् शिवः | तच् शिवः | (स्तोः श्चुना श्चुः) |
| | तच् शिवः | तच्छिवः | (शश्छोऽटि) |

| | | | |
|---|---|---|---|
| **ख.** | उद् स्थानम् | उद् थ् थानम् | (उदः सथा स्तम्भोः पूर्वस्य) |
| | उद् थ् थानम् | उद् थानम् (खरि च) | |
| | उद् थानम् | उत्थानम् (झरो झरि सवर्णे) | |
| **ग.** | शिव छाया | शिव त् छाया | (स्तोः श्चुना श्चुः) |
| | शिव त् छाया | शिवद् छाया | (छे च) |
| | शिवद् छाया | शिवज् छाया | (झलां जशोऽन्ते) |
| | शिवज् छाया | शिवच्छाया | (खरि च) |

♦ **उत्तराणि लिखत।**

**क.** षट्सन्तः इत्यत्र ष्टुत्वनिषेधकसूत्रं किम्?

**ख.** कान् कान् इत्यत्र द्वितीयस्य कान् शब्दस्य आम्रेडितसंज्ञा केन सूत्रेण?

**ग.** चक्रिन् त्रायस्व इति स्थिते नकारस्य रुत्वं केन सूत्रेण?

**घ.** पदान्तस्य अनुस्वारस्य ययि परे परसवर्णः केन विहितः?

♦ **प्रक्रियासहितं विशदयत।**

रामश्शेते , षट्सन्तः,तच्छिवः।

♦ **काव्यादिभ्यो सञ्चितानि हल्सन्धि रूपाणि सूत्रसाहाय्येन समर्थयत।**

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रमठ संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | परिहारनिर्देशः |
|---|---|---|---|---|
| 1. | यथोचितं योजितम् । | | | |
| 2. | स्खालित्यं संशोधितम्। | | | |
| 3. | उत्तराणि लिखितानि। | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संख्यया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

## पठनाधिगमः

- सूत्राणि व्याचष्टे। उदाहरणेन सन्धिनियमान् विशदयति। सूत्रानुसारं पदानि सन्धातुं विश्लेषयितुं प्रभवति।
- चर्त्वसन्धिं जश्त्वसन्धिं च परिचाययति प्रयुङ्क्ते च सन्धियुक्तपदानि विश्लेषयति।
- तुगागमसन्धिं विशदयति।

# ४ अथ विसर्गसन्धिप्रकरणम्।

**सूत्रम् : विसर्जनीयस्य सः। 8/3/34/**

वृत्तिः : खरि विसर्जनीयस्य सः स्यात्।

उदाः- विष्णुस्त्राता। विष्णुः त्राता इति स्थिते तकारे परे विसर्गस्य सः। एवम् शिरः छेदः इत्यत्र विसर्गस्य सकारः, सकारस्य "स्तोः श्चुना श्चुः" इति श्चुत्वे शकारे शिरश्च्छेदः इति रूपम्।

**सूत्रम् : वा शरि। 8/3/36/**

वृत्तिः : शरि विसर्गस्य विसर्गो वा स्यात्। हरिः शेते। हरिश्शेते।

टिप्पणी : शर् परे विसर्गस्य विकल्पेन विसर्गः। विसर्गाभावपक्षे "विसर्जनीयस्य सः" इति सूत्रेण सकारादेशे सकारस्य श्चुत्वे शकारे हरिश्शेते। एवं मनः सुखम्, मनस्सुखम् इत्यत्रापि।

**सूत्रम् : ससजुषो रुः । 8/2/66/**

वृत्तिः : पदान्तस्य सस्य सजुष् शब्दस्य च रुः स्यात्।

टिप्पणी : सश्च सजुष् च ससजुषौ तयोः ससजुषोः। पदान्तस्य सस्य सजुषश्च। रुः स्यात् इति सूत्रार्थः। रामस् इति स्थिते सकारस्य रुत्वं, रेफस्य च "खरवसानयोर्विसर्जनीयः" इति विसर्गश्च रामः इति रूपम्।

**सूत्रम् : अतो रोरप्लुतादप्लुते। 6/1/113/**

वृत्तिः : अप्लुतादतः परस्य रोः उः स्याद् अप्लुते अति। शिवोऽर्च्यः।

टिप्पणी : अतः रोः अप्लुतात् अप्लुते इति पदच्छेदः। " ऋत उत् " इत्यस्मात् सूत्रात्

उत् इति "एङः पदान्तादति" इति सूत्रात् अति इति चानुवर्तते। अत् इत्यनेन ह्रस्वः अकारः बोध्यः। (तपरस्तत्कालस्य) अप्लुतात् ह्रस्वादकारात् परस्य रोः (रेफस्य) उत् (उ) स्यात् अप्लुते ह्रस्वे अकारे परे इति सूत्रार्थः। शिव स् अर्च्यः इति स्थिते "ससजुषो रुः" इति सकारस्य रुत्वम्। शिवर् अर्च्यः। सूत्रेणानेन रेफस्य उकारे, "आद् गुणः" इति अकारउकारयोः गुणः ओकारः एकादेशः। शिवो + अर्च्यः। "एङः पदान्तादति" इति पूर्वरूपम् शिवोऽर्च्यः इति रूपम्। ह्रस्वाभावे उत्वं नास्ति रामः आगच्छति। बालाः अगच्छन् इत्यादि स्थले उत्वं नास्ति।

**सूत्रम् : हशि च। 6/1/114/**

वृत्तिः : अप्लुतादतः परस्य रोः उः स्यात् हशि। शिवो वन्द्यः।।

टिप्पणी : पूर्वोक्तवदेवात्रापि नियमः। परन्तु अति इत्यस्य स्थाने हशि इति बोद्धव्यम्। हशि परेऽपि पूर्वोक्तवत् रोः उः स्यात् इत्यर्थः। शिवस् + वन्द्य् इति स्थिते सकारस्य रुत्वे (ससजुषो रुः) हशि परे "हशि च" इति उत्वे, "आद् गुणः" इति गुणे शिवो वन्द्यः इति रूपम्। प्रातर् + अत्र - प्रातरत्र। पुनर् + अपि = पुनरपि। पुनर्वाचनम्, इत्यादौ श्रूयमाणो रेफः न रुः (सकारस्थानिकः)। अतस्तत्र न उत्वमिति बोध्यम्।

शिव स् + वन्द्यः - शिव र् वन्द्यः - ससजुषो रुः
शिव उ वन्द्यः - हशि च
शिवो वन्द्यः - आद्गुणः

**सूत्रम् : भो भगोऽघोऽपूर्वस्य योऽशि। 8/3/17/**

वृत्तिः : एतत्पूर्वस्य रोः यादेशः स्यात् अशि। देवा इह देवायिह। भोस् भगोस् अघोस् इति सान्ताः निपाताः। तेषां रोः यत्वे कृते -

**सूत्रम् : हलि सर्वेषाम्। 8/3/22/**

वृत्तिः : भो भगो अघो अपूर्वस्य यस्य लोपः स्यात् हलि, सर्वेषां मते। भो देवाः। भगो नमस्ते। अघो याहि।

टिप्पणी : भो भगो अघो इत्यादिसूत्रेण विहितः यादेशः "अतो रोरप्लुतादप्लुते" "हशि च" इति सूत्रद्वयेन विहितम् उत्वं प्रति असिद्धः। अतः उत्वस्य अप्रवृत्तावेवेदं सूत्रं (भो भगो - इत्यादि) प्रवर्तते। देवास् + यान्ति इति स्थिते रुत्वं (ससजुषोः) देवार् यान्ति। अत्र अकारपूर्वत्वात् अश् परत्वाच्च रोः यत्वम्। देवाय् यान्ति। "लोपः शाकल्यस्य" इति सूत्रेण विकल्पेन यलोपे प्राप्ते विकल्पं विरुध्य यलोपस्य नित्यत्वं बोधयितुमिदं सूत्रम्- "हलि सर्वेषाम्" इति। अतः देवा यान्ति इति रूपम्। देवास् इह इत्यत्र सकारस्य रुत्वे देवार् इह यत्वे देवाय् इह "लोपः शाकल्यस्य" इति विकल्पेन यलोपे देवा इह यलोपाभावे देवायिह। "भोस् भगोस् " इत्यत्रापि एवमेव रुत्वे यत्वे "हलि सर्वेषाम्" इति नित्यं यलोपे भो देवा इत्यादि रूपाणि।

**सूत्रम् : रोऽसुपि। 8/2/69/**

वृत्तिः : अह्नो रेफादेशः स्यान्न तु सुपि। अहरहः।

टिप्पणी : न सुप् असुप् सु औ जस् इत्याद्याः वक्ष्यमाणाः एकविंशतिः प्रत्ययाः सुप् शब्देन गृह्यन्ते। अहन् शब्दस्य रेफादेशः स्यात्, सुपि परे न स्यात् इत्यर्थः।

(अह्नां गणः) अहन् + गणः इत्यत्र सुप् परत्वाभावात् अहन् शब्दस्य नकारस्य रेफादेशः। अहर्गणः इति रूपम्। रुत्वाभावान्न उत्वम्। अहन् + अहः = अहरहः इति। असुपि इति उक्तत्वात् अहन् भ्याम् इत्यत्र सुपि परे नकारस्य रुत्वम्, रोः उत्वम् "आद् गुणः" इति गुणश्च अहोभ्यामिति रूपम्।

**सूत्रम् : रो रि। 8/3/14/**

वृत्तिः : रेफस्य रेफे परे लोपः स्यात्।

टिप्पणी : रः इति षष्ठ्यन्तम्। रि इति सप्तम्यन्तम्। लोपः इति पदमनुवर्तते। रेफे परे रेफस्य लोपः इत्यर्थः। पुनर् रमते इत्यत्र अनेन प्रथमः रेफः लुप्यते रेफे परे। पुन रमते इति जाते;

**सूत्रम् : ढ्रलोपे पूर्वस्य दीर्घोऽणः। 6/3/111/**

वृत्तिः : ढरेफयोः लोपनिमित्तयोः पूर्वस्य अणो दीर्घः स्यात्। पुना रमते। हरी रम्यः।

शम्भू राजते। अणः किम्? तृढः वृढः। मनस् रथः इत्यत्र रुत्वे, “हशि च” इत्युत्वे “रो रि” इति रेफलोपे प्राप्ते;

**सूत्रम् : विप्रतिषेधे परं कार्यम्। 1/4/2/**

वृत्तिः : तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते “रो री” त्यसिद्धत्वात् उत्वमेव। मनोरथः।

टिप्पणी : तुल्यबलविरोधः एव विप्रतिषेधः। विप्रतिषेधे सति परेण शास्त्रेण विहितं कार्यं भवति इति सूत्रार्थः। अष्टाध्यायीपाठमनुसृत्यैवात्र पूर्वपरविवेकः। क्वचिच्चरितार्थयोः द्वयोः शास्त्रयोः एकस्मिन् लक्ष्ये समावेशः तुल्यबलविरोधः। देवार् + याति इत्यत्र “रो रि” इत्यस्य प्राप्तिर्नास्ति। अत्र हशि चेति उत्वम्। अत्र तत् शास्त्रं चरितार्थम्। पुनर् + रमते - अत्र रेफस्य रुत्वाभावात् “हशि च” इति न प्राप्नोति। तत्र “रोरी” ति रेफलोपः। एवं चरितार्थयोस्तयोः मनर् + रथः इत्यत्र युगपत्प्राप्तिः। अतः तुल्यबलविरोधः।

प्रकृते मनर् + रथः इति स्थिते “रोरि” इति सूत्रेण विहितः रेफलोपः प्राप्नोति, तदनिष्टम्। मन उ रथः। “आद् गुणः” इति गुणे मनोरथः इति रूपम्। अत्र “पूर्वत्रासिद्धम्” इति षाष्ठं “हशि चेति” शास्त्रं प्रति “रोरि” इत्यस्य त्रैपादिकस्यासिद्धत्वात् “हशि च” इति उत्वमेव।

**सूत्रम् : एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। 6/1/132/**

वृत्तिः : अककारयोः एतत्तदोः यः सुः तस्य लोपः स्यात् हलि, न तु नञ् समासे। एष विष्णुः। स शम्भुः। अकोः किम्? एषको रुद्रः। अनञ्समासे किम्? असः शिवः। हलि किम्? एषोऽत्र।

टिप्पणी : न विद्यते कः ययोः तौ अकौ तयोः अकोः ककाररहितयोः इत्यर्थः। एतत्तदोः इत्यस्य विशेषणम्। ककाररहितयोः एतद् तद् शब्दयोः विहितः सु इति प्रथमैकवचनविभक्तिप्रत्ययः लुप्यते हलि परे नञ्समासे न इति सूत्रार्थः। एषस् + विष्णुः = एष विष्णुः। एषस् + बालः = एष बालः। सस् शम्भुः स शम्भुः। एषकस् + रुद्रः इत्यत्र सुलोपो नास्ति। एतच्छब्दस्य ककारसहितत्वात्। अतः अकोः इत्युक्तम्। रुत्वे उत्वे गुणे एषको रुद्रः इति रूपम्। न सः असः

नञ्समासोऽयम्। अतः अस स् शिवः इत्यत्र न सुलोपः, रुत्वे "खरवसानयोर्विसर्जनीयः" इति विसर्गे असः शिवः इति रूपम्। "वा शरि" इति विकल्पेन सत्वे श्चुत्वे असश्शिवः इत्यपि रूपम्। एषस् अत्र इत्यत्र सुलोपनिषेधाय हलि इत्युक्तम्। अत्र अचि परे रुत्वे "अतो रोरप्लुतादप्लुते" इति उत्वे गुणे पूर्वरूपे एषोऽत्र इति रूपम्।।

इति विसर्गसन्धिप्रकरणम्।



## पठनप्रवर्तनानि।

- **सूत्रं व्याख्यात।**

**क.** विसर्जनीयस्य सः　　ख. विप्रतिषेधे परं कार्यम्।

- **उत्तराणि लिखत।**

**क.** सुपि परे अहन् शब्दस्य रेफादेशः कुतो न भवति?

**ख.** पुनर् रमते इत्यस्य प्रथमः रेफः केन लुप्यते?

**ग.** हरिः शेते इत्यत्र विसर्गः कथं विहितः?

- **प्रक्रियायां रिक्तस्थानानि यथोचितं पूरयत।**

**क.** शिवः अर्च्यः - विसर्जनीयस्य सः

शिवस् अर्च्यः - ____________

शिवर् अर्च्यः - ____________

__________ - आद्गुणः

शिवो अर्च्यः - एङः पदान्तादति

______________ ।।

**ख.** पुनर् रमते - ______________

पुन रमते - ढ्रलोपे पूर्वस्य दीर्घोऽणः

______________ ।।

- **काव्यादिभ्यो सञ्चितानि विसर्गसन्धिरूपाणि सूत्रसाहाय्येन समर्थयत।**

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रमठ संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | परिहारनिर्देशः |
|---|---|---|---|---|
| 1. | सूत्रं व्याख्यातम्। | | | |
| 2. | उत्तराणि लिखितानि। | | | |
| 3. | प्रक्रियायां रिक्तस्थानानि यथोचितं पूरितानि। | | | |

*भागिकतया कृतं चेत् कथं पूर्णं कृतम् इति संख्यया सूचयतु।

१. अध्यापकसाहाय्येन।
२. ग्रन्थसाहाय्येन।
३. छात्राणां साहाय्येन।
४. इतरेषां साहाय्येन।

## पठनाधिगमः

- सन्धिनियमान् विशदयति। सूत्रानुसारं पदानि सन्धाति विश्लेषयति च।
- सूत्राणि वदति लिखति च। सूत्रं पठित्वा वृत्तिं वदति लिखति च।
- नूतनसन्दर्भेषु सन्धिनियमान् प्रयुङ्क्ते।

५

# अथ विभक्त्यर्थप्रकरणम्

## (कारकप्रकरणम्)

**सूत्रम्– प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। २-३-४६**

**वृत्तिः- नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्। प्रातिपदिकार्थमात्रे- उच्चैः, नीचैः, कृष्णः। श्रीः। ज्ञानम्। लिङ्गमात्रे- तटः तटी, तटम्। परिमाणमात्रे द्रोणो व्रीहिः। वचनं संख्या। एकः, द्वौ, बहवः।**

टिप्पणिः - प्रातिपदिकार्थे- पदम्पदमिति प्रतिपदं, प्रतिपदे भवं, प्रातिपदिकं, तस्यार्थः प्रातिपिदिकार्थः। स च लिङ्गं च परिमाणं च वचनं चेति प्रातिपदिकार्थलिङ्गपरिमाणवचनानि ,तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं तस्मिन्। द्वन्द्वान्ते श्रूयमाणस्य मात्रशब्दस्य प्रत्येकमन्वयात् प्रातिपदिकार्थमात्रे, लिङ्गमात्रे परिमाणमात्रे वचनमात्रे इति अर्थः सम्पद्यते। नियतोपस्थितिकः प्रातिपदिकार्थः इति, नियता (व्यापिका) उपस्थितिर्यस्य नियमेनोपस्तथितिः स नियतोपस्थितिकः। प्रातिपदिकार्थमात्रे प्रथमा स्यात्।

उदा- कृष्णः, श्रीः, ज्ञानम् (नियतलिङ्गशब्दः) उच्चैः, नीचैः इत्यादयः अलिङ्गा-व्ययशब्दाः अपि प्रातिपदिकार्थमात्रे इत्यस्य उदाहरणानि। लिङ्गं तु न प्रातिपदिकार्थं विहाय तिष्ठति। अतः कुत्रापि लिङ्गमात्रं न प्रतीयते। लिङ्गं तु न प्रातिपदिकार्थशब्देन पृथक् ज्ञानविषयः किन्तु प्रातिपदिकार्थेन सहैव। अतः लिङ्गमात्राधिक्ये च प्रथमा स्यात्। प्रातिपदिकार्थः अधिकतया लिङ्गार्थश्च तत्र विषयः। अनियतलिङ्गशब्दाः तटादयः लिङ्गमात्राधिक्यस्य उदाहरणानि। तटः, तटी, तटम् इति। परिमाणशब्दः अपि प्रातिपदिकार्थेन सह एव बोधविषयः। द्रोणो व्रीहिः इति परिमाणमात्रस्याधिक्ये प्रथमा इत्यस्य उदाहरणम्। द्रोणरूपपरिमाणपरिच्छिन्नः व्रीहिः इति तस्यार्थः। संख्या एव वचनशब्देन निर्दिश्यते। एकः

द्वौ बहवः एते वचनमात्र इत्यस्योदाहरणम्। अत्र एकत्वद्वित्वबहुत्वानां नियमेनोपस्थित्या प्रातिपदिकार्थे इत्येव सिद्धे वचनग्रहणं व्यर्थमेवेति न शङ्कनीयम्। उक्तार्थानामप्रयोग इति सु, औ जस् इति विभक्तेरप्राप्तौ वचनमात्रे प्रथमेति विधिः।

उक्तार्थनामप्रयोगः इति न्यायेन प्रातिपदिकेन एकत्वादीनमुक्तत्वात् विभक्तिः न स्यात्। तथा च एकादीनामपदत्वेन प्रयोगार्हता च न स्यात्। अतः तत्र प्रथमा विभक्तिः प्रकृत्यर्थानुवादिका इति स्यादुत्पत्तिः एकशब्दात् एकत्वानुवादकः सुः। द्विशब्दात् द्वित्वानुवादकः औ प्रत्ययः। एवमन्यत्रापि।

**सूत्रम्- सम्बोधने च। २-३-४७**

**वृत्तिः- इह प्रथमा स्यात्। हे राम। इति प्रथमा।**

टिप्पणी : प्रथमा इति अनुवर्तते। सम्बोधनार्थे च प्रथमा स्यात् इति सूत्रार्थः। उदाः- हे राम त्वं गच्छ। अत्र राम इति संबोधनम्। सम्बोधनार्थे हे भोः आदि निपाताः प्रयुज्यन्ते।

**सूत्रम्- कर्तुरीप्सिततमं कर्म। १-४-४९**

**वृत्तिः- कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्।**

**कर्मसंज्ञा।**

टिप्पणि : कर्मसंज्ञाविधायकमिदं सूत्रम्। कर्तुः ईप्सिततमं कर्म इति पदच्छेदः। आप्तुमिष्टम् ईप्सितम्। अतिशयेन ईप्सितम् ईप्सिततमम्। इष्टमिति मतिबुद्धिपूजार्थेभ्यश्च इति वर्तमाने क्तः। कारके इत्यधिक्रियते, प्रथमया विपरिणम्यते च। केन ईप्सिततममित्यकाङ्क्षायां स्वनिष्ठक्रियया इति सिध्यति। एवञ्च कर्तुः स्वनिष्ठक्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः। हरिं भजति इति उदाहरणम्।

भक्तः हरिं भजति इत्यत्र कर्तुः भक्तस्य भजनक्रियया आप्तुमिष्टतमो हरिः। तस्य अनेन सूत्रेण कर्मत्वम्। रामः ओदनं भुङ्क्ते। अत्र कर्ता रामः भोजनक्रियया आप्तुमिष्टतमः ओदनः। अतः अनेन सूत्रेण ओदनस्य कर्मत्वम्।

**सूत्रम् कर्मणि द्वितीया। २-३-२**

**वृत्तिः- अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मादौ प्रथमा- हरिः सेव्यते। लक्ष्म्या सेवितः।**

टिप्पणि : अनभिहिते इति अधिकारः। अनभिहिते इत्यस्य अनुक्ते इत्यर्थः अनुक्ते कर्मणि द्वितीया स्यादिति सूत्रार्थः। भक्तः हरिं भजति इत्युदाहरणम्। अत्र कर्तुरीप्सिततमं कर्म इति सूत्रेण हरेः कर्मसंज्ञा। भजति इत्यत्र तिङा कर्ता अभिहितः। कर्म अनभिहितम्। अतः अनेन सूत्रेण हरिशब्दात् द्वितीया। लक्ष्म्याः हरिः सेव्यते इत्यत्र तिङा कर्म अभिहितमिति हरिशब्दात् द्वितीया न।

**सूत्रम्- अकथितं च। १-४-५१**

**वृत्तिः- अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।**

**दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशास्जिमथ्मुषाम्।**
**कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।**

**गां दोग्धि पयः। बलिं याचते वसुधाम्। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। शतं मुष्णाति देवदत्तम्। ग्राममजां नयति हरति कर्षति वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि। इति द्वितीया।**

टिप्पणि : कारके इत्यधिक्रियते, प्रथमया विपरिणम्यते च। कर्म इति अनुवर्तते। अकथितम् इत्यस्य अविवक्षितमिति अर्थः उद्दिष्टः। एवञ्च अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः। तत्तु अप्रधानकर्म एव। अत्र अव्याप्त्यतिव्याप्तिदोषपरिहाराय केषां धातूनां योगे अकथितकर्म संभाव्यते इति परिगणनं क्रियते।

**श्रद्धेयांशः**

दुह्, याच्, पच्, दण्ड् रुधि, प्रच्छ्, चि, ब्रू, शास्, जि, मथ्, मुषाम्
कर्मयुक्स्यादकथितं तथा स्यात् नी, हृ कृष् वहाम्।

उदाः- गां दोग्धि पयः। अत्र कर्तुः ईप्सिततमत्वात् पयः प्रधानकर्म। अपादानविवक्षायां कर्म गाम् इति। अत्र दोहनक्रियायाः अपादानं भवति गौः। तस्य अपादानत्वाविवक्षायाम् अकथितं च इति सूत्रेण कर्मत्वम्। अतः तस्मात् कर्मणि द्वितीया।

एवं बलिं याचते वसुधाम्। गर्गान् शतं दण्डयति। माणवकं पन्थानं पृच्छति। वृक्षम्

अवचिनोति फलानि। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। अपादानत्वाविवक्षायां कर्मत्वं द्वितीया च। तण्डुलान् ओदनं पचति। अत्र तण्डुलेन ओदनं पचते। अतः तण्डुलं करणमेव। तदविवक्षायाम् अकथितं च इति सूत्रेण कर्मत्वं, कर्मणि द्वितीया इति तण्डुलशब्दात् द्वितीया च। व्रजमवरुणद्धि गाम्। व्रजस्याधिकरणत्वाविवक्षायां कर्मत्वम्। माणवकं धर्मं ब्रूते। माणवकस्य संप्रदानत्वाविवक्षायां कर्मत्वम्। ग्राममजां नयतीत्यादौ ग्रामस्याधिकरणत्वाविवक्षायां कर्मत्वम्।

**सूत्रम्- अनुर्लक्षणे १।४।८४**

**वृत्तिः- लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात्।**

**सूत्रम्- कर्मप्रवचनीययुक्ते द्वितीया २।३।४**

**वृत्तिः कर्मप्रवचनीययुक्ते द्वितीया विभक्तिः स्यात्।**

टिप्पणी : जपमनुप्रावर्षत्। जपानन्तरं प्रावर्षत् हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः।

**सूत्रम्- तृतीयार्थे १।४।४५**

**वृत्तिः- तृतीयार्थे अनुः कर्मप्रवचनीयसंज्ञः स्यात्।**

उदा- नदीम् अन्ववसिता सेना । नद्या सह सम्बन्धः सेना इत्यर्थः।

**अभितः परितः समया निकषाहाप्रतियोगेऽपि (वार्तिकम्)**

उदा : अभितः कृष्णम्।

परितः कृष्णम्।

ग्रामं समया।

निकषा गङ्गाम्।

हा कृष्णाभक्तम्।

इति द्वितीयाविभक्तिः।

**सूत्रम्- स्वतन्त्रः कर्ता। १-४-५४**

**वृत्तिः- क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।**

टिप्पणि : क्रियायां प्रधानतया वविक्षितः इति स्वतन्त्रः इति पदेन उद्दिश्यते। क्रियायां स्वातन्त्र्येण विवक्षितं कारकं कर्ता इति सूत्रार्थः।

देवदत्तः ग्रामं गच्छति। अस्मिन् वाक्ये गमनक्रियायां स्वातन्त्र्येण विवक्षितः देवदत्तः कर्ता।

**सूत्रम्- साधकतमं करणम्। १-४-४२**

**वृत्तिः- क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्।**

**करणसंज्ञा।**

टिप्पणि : करणसंज्ञाविधायकमिदं सूत्रम्। साधकम् उपकारकम्, अत्यन्तं साधकं साधकतमम् प्रकृष्टोपकारकमित्यर्थः। अधिकृतं कारके इति प्रथमया विवरिणम्यते। एवञ्च क्रियासिद्धो प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यादिति सूत्रार्थः। यद्व्यापाराद् अनन्तरं फलनिष्पत्तिः तदेव प्रकृष्टोपकारकम्। यथा बाणेन हतः। अत्र बाणव्यापारादनन्तरं हननक्रिया जायत इति बाणस्य करणत्वम्। कर्तृकरणयोस्तृतीया इति सूत्रेण बाणशब्दात् तृतीया विभक्तिः।

**सूत्रम्- कर्तृकरणयोस्तृतीया। २-३-१५**

**वृत्तिः- अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो बाली इति तृतीया।**

टिप्पणि : अनभिहिते इति अनुवर्तते। कर्ता च करणं च कर्तृकरणे तयोः सप्तम्यन्तम्। अनभिहिते कर्तरि करणे च तृतीया स्यात्। तिङा, कृता, समासेन वा कर्ता कर्म, करणं च अभिहितं चेत् कर्त्रादौ प्रथमाविभक्तिः स्यात्।

उदाः - रामेण बाणेन हतो बाली। अत्र हतः इत्यत्र क्त प्रत्ययः कर्मार्थं सूचयति। बालीशब्दः कर्म इत्यभिहितम्। अतः बाली इति प्रथमा। कर्ता करणं च न अभिहिते अतः रामेण, बाणेन इति तृतीया। देवदत्तः ग्रामं गच्छति इत्यत्र गच्छतीति क्रियया देवदत्तोऽभिहितः इत्यतो न तृतीया ,किन्तु प्रथमैव।

**सूत्रम्- हेतौ २।३।२३**

टिप्पणी- हेत्वर्थे तृतीया स्यात्।

उदा दण्डेन घटः।

**सूत्रम्- सहयुक्तेऽप्रधाने २।३।१९**

टिप्पणी : सहार्थेन युक्ते अप्रधाने तृतीया। सह, समं, साकं सार्धम् एभिर्योगे तृतीया स्यात्।
उदा पुत्रेण सह आगतः पिता। सीतया सार्धम् आगतः रामः।

इति तृतीया विभक्तिः।

**सूत्रम्- कर्मणा यमभिप्रैति स सम्प्रदानम्। १-४-३२**

**वृत्ति– दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।**

**सम्प्रदानसंज्ञा।**

टिप्पणि : सम्प्रदानसंज्ञा अनेन सूत्रेण विधीयते। सम्यक् प्रदीयते इति सम्प्रदानम् इत्यन्वर्थसंज्ञा। अतः कस्य कर्मणा इति आकांक्षायां दानस्य कर्मणा इति सिद्ध्यति। कारके इत्यधिक्रियते, प्रथमया विपरिणम्यते च। एवञ्च दानस्य कर्मणा यमभिप्रैति सः सम्प्रदानसंज्ञः स्यादिति सूत्रार्थः। विप्राय गां ददाति इत्युदाहरणम्। अत्र कर्ता देवदत्तादि,दानस्य कर्म गौः। तेन संबन्धुमिष्टः विप्रः। तस्यानेन सूत्रेण सम्प्रदानसंज्ञा।

**सूत्रम्- चतुर्थी सम्प्रदाने। २-३-१३**

**वृत्ति– सम्प्रदाने चतुर्थी स्यात्। विप्राय गां ददाति।**

टिप्पणि : अनभिहिते इति अनुवर्तते। अनभिहिते सम्प्रदाने चतुर्थी स्यात् इति सूत्रार्थः।
उदाः- विप्राय गां ददाति। दानीयः विप्रः इत्यत्र अनीय इति कृत्प्रत्ययेन सम्प्रदानम् अभिहितम्। अतः विप्रशब्दे चतुर्थी न, प्रथमा एव।

**सूत्रम्- नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च। २-३-१६**

**वृत्ति– एभिर्योगे चतुर्थी स्यात्। हरये नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।**

टिप्पणिः :-योगशब्दस्य सम्बन्धे इत्यर्थः। चतुर्थी इति अनुवर्तते. नमः, स्वस्ति, स्वाहा, स्वधा, अलं वषट् शब्दानां योगे चतुर्थी स्यात्।

उदाः- हरये नमः। अत्र नमः शब्दयोगे हरिशब्दात् अनेन सूत्रेण हरये इति चतुर्थी। स्वस्तियोगे प्रजाभ्यः। स्वाहाशब्दयोगे अग्नये स्वाहा, स्वधाशब्दयोगे पितृभ्यः स्वधा च चतुर्थी विभक्तिः।

**वार्तिकम्- अलमिति पर्याप्त्यर्थग्रहणम्।**

टिप्पणिः - तेन दैत्येभ्यो हरिरलं प्रभुः, समर्थः शक्तः इत्यादि। अलम् इति शब्देन पर्याप्त्यर्थस्य शब्दस्य ग्रहणम्। अतः प्रभुः समर्थः, शक्तः इत्यादीनां योगे दैत्येभ्यः इति चतुर्थी।

इति चतुर्थीविभक्तिः।

**सूत्रम्- ध्रुवमपायेऽपादानम्। १-४-२४**

**वृत्तिः- अपायो विश्लेषः। तस्मिन् साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानसंज्ञं स्यात्।**

**अपादानसंज्ञा।**

टिप्पणिः :-अपादानसंज्ञाविधायकमिदं सूत्रम्। ध्रुवम्, अपाये, अपादानम् इति पदच्छेदः। ध्रुवमित्यस्य स्थिरमित्यर्थस्य प्रसिद्धत्वेऽपि अत्र प्रकृते अवधिभूतमित्येवार्थः। अपायो विश्लेषः। कारके इति अधिक्रियते, प्रथमया विपरिणम्यते च। एवञ्च। विश्लेषे साध्ये यदवधिभूतं कारकं तदपादानसंज्ञं स्यादिति सूत्रार्थः। ग्रामादायाति। अत्र कस्मात् इति आकाङ्क्षाविषयत्वात् ग्रामः आगमनस्यावधिः. अतः अनेनसूत्रेण ग्रामः इति शब्दस्यापादानसंज्ञां लभते।

**सूत्रम्- अपादाने पञ्चमी। २-३-२८**

**वृत्तिः- अपादाने पञ्चमी स्यात्। ग्रामादायाति। धावतोऽश्वात् पततीत्यादि।**

टिप्पणि : अनभिहितेत्यनुवर्तते।

उदा : धावतोऽश्वात् पतति। अत्र अश्वस्य ध्रुवमपायेऽपादानम् इति सूत्रेण अपादानसंज्ञायाम् अपादाने पञ्चमी इति सूत्रेण अश्वात् इति पञ्चमी।

इति पञ्चमीविभक्तिः।

**सूत्रम्- षष्ठी शेषे। २-३-५०**

**वृत्तिः- कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसंबन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः इति षष्ठी।**

टिप्पणिः :-उक्तादन्यः शेषः। प्रातिपदिकार्थः उक्तः। कर्मादिकारकाणि चोक्तानि। अतः कारकप्रातिपदिकार्थव्यतिरिक्तः शेषः। स्वस्वामिभावः, अवयवावयविभावः, जन्यजनकभावः इत्यादिसम्बन्धः शेषशब्देनोच्यते। तादृशसम्बन्धबोधनाय, षष्ठी स्यादिति सूत्रार्थः। राज्ञः पुरुषः इत्युदाहरणम्। अत्र राजा सेव्यः पुरुषस्तु सेवकः। अतस्तयोः सम्बन्धः सेव्यसेवकभावः। तत्र षष्ठी। कर्मादीनामपि कर्मत्वादिना अविवक्षायाम् सम्बन्धसामान्यविवक्षायां षष्ठी। सतां गतमित्यत्र सतां कर्तृत्वाविवक्षायां सम्बन्धसामान्यविवक्षायां (सतामिति) षष्ठी। सज्जनसंबन्धि गमनमित्यर्थः। कर्तृत्वविवक्षायां तु सद्भिः गतमित्यपि प्रयोगः। सर्पिषो जानीते इत्यत्र सर्पिषः करणत्वाविवक्षायां ततः षष्ठी सर्पिषा उपायेन प्रवर्ततेत्यर्थः। तत्र जानीते इति तु न ज्ञानार्थकः। मातुः स्मरति (कर्मत्वाविवक्षा) एधोदकस्योपस्कुरुते (कर्मत्वाविवक्षा) (एधः - काष्ठम् दकस्य - उदकस्य उपस्कुरुते - उपस्करणं गुणाधानम्) भजे शम्भोश्चरणयोः- (कर्मत्वाविवक्षेति बोध्यम्)

इति षष्ठीविभक्तिः।

**सूत्रम्- आधारोऽधिकरणम् १-४-४५**

**वृत्तिः- कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरणसंज्ञं स्यात्।**

**अधिकरणसंज्ञा।**

टिप्पणिः- अधिकरणसंज्ञाविधायकं सूत्रमिदम्। अत्र कस्य आधारः इति आकाङ्क्षाविषयत्वात् क्रियायाः इति अर्थो लभ्यते। अमूर्तक्रियायाः आधारः- कर्तृकर्मद्वारा इति सिद्ध्यते।

उदा- रामः कटे आस्ते। अत्र रामद्वारा कटः आसनक्रियायाः आधारः।

रामः स्थाल्यां तण्डूलं पचति। अत्र स्थाली तण्डुलकर्मद्वारा पाकक्रियायाः आधारः।

**सूत्रम्- सप्तम्यधिकरणे च। २-३-३६**

**वृत्तिः- अधिकरणे सप्तमी स्यात्। चकाराद् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छा अस्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा। इति सप्तमी।**

टिप्पणिः :- अनभिहिते इति अनुवर्तते। अनभिहिते अधिकरणे च सप्तमी स्यात्। 'च' इति पदेन दूरान्तिकार्थशब्दात् अपि सप्तमी स्यात् इति ज्ञातव्यम्।

उदाः- कटे आस्ते। अत्र देवदत्तादिकर्तृद्वारा कटः आसनक्रियायाः आधारः,तस्य आधारोऽधिकरणम् इति सूत्रेण अधिकरणसंज्ञा। अतः अनेन सूत्रेण कटशब्दात् सप्तमीविभक्तिः। आधारः तु औपश्लेषिकः, अभिव्यापकः, वैषयिकः इति त्रिधा विभज्यते। उपश्लेषः- संयोगः अव्याप्यवृत्तिः-कटे आस्ते, गृहेआस्ते। अत्र आसनक्रिया कटं गृहं वा न पूर्णतया व्याप्नोति। अभिव्यापकः - व्याप्यवृत्तिः-स्थाल्यां पचति - अत्र ओदनाादिकर्मद्वारा स्थाली पाकक्रियाया आधारः। शेषं पूर्ववत्। वैषयिकः -मोक्षे इच्छास्ति। अत्र मोक्षः इच्छायाः विषयः अतो वैषयिकाधिकरणम्, अतः सप्तमी। सर्वस्मिन् अत्मास्ति। आत्मा सर्वं व्याप्य वर्तते। अतः सर्वस्मिन् इति अभिव्यापकाधिकरणम्। एवं तिले तैलम् इत्यपि। वनस्य दूरे। सप्तम्यधिकरणे च इति सूत्रे चकारेण दूरान्तिकार्थेभ्यः इत्यनुकृष्यते। अतः तेभ्योऽपि सप्तमी।



## पठनप्रवर्तनानि

**१. रेखाङ्कितानां सुब्विभक्तीः साधयत।**

१. हरिं भजति।

२. माणवकं पन्थानं पृच्छति।

३. रामेण बाणेन हतो बाली।

४. धावतो अश्वात् पतति।

५. सतां गतम्।

६. मोक्षे इच्छा अस्ति।

**२. उत्तरयत**

१. आधारः कतिविधः के च ते? विशदयत।

**३. संज्ञाविधायकत्वे किं प्रयोजनम् इति विशदयत।**

१. कर्तुरीप्सिततमं कर्म।

२. ध्रुवमपायेऽपादानम्।

३. साधकतमं करणम्।

- **काव्यादिभ्यो सञ्चितानि कारकरूपाणि सूत्रसाहाय्येन समर्थयत।**
- **काव्यादिभ्यो सञ्चितानि उपपदविभक्तिरूपाणि सूत्रसाहाय्येन समर्थयत।**

**पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रमठ संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम्* | परिहारनिर्देशः |
|---|---|---|---|---|
| 1. | रेखाङ्कितपदानां विभक्तयः साधिताः। | | | |
| 2. | उत्तरम् लिखितम्। | | | |
| 3. | संज्ञाविधायकत्वे किं प्रयोजनं इति विशदीकृतम्। | | | |

*भागिकतया कृतं चेत् कथ पूर्णं कृतम् इति संख्यया सूचयतु।

१. अध्यापकसाहाय्येन।

२. ग्रन्थसाहाय्येन।

३. छात्राणां साहाय्येन।

४. इतरेषां साहाय्येन।

# पठनाधिगमाः

- प्रथमाविभक्तिं प्रत्यभिजानाति तथा संबोधनप्रथमाविधायकं सूत्रं लिखति च।
- सूत्रस्य आशयं प्रयोगपरिचयञ्च सम्पादयति। कर्तृकारकं विवृणोति।
- कर्मकारकं प्रत्यभिजानाति। कर्मसंज्ञाविधायकं सूत्रं, कर्मणः द्वितीया विभक्तिविधायकं सूत्रं च वदति।
- कर्तृकरणकारकान् प्रत्यभिजानाति। अनभिहिते कर्तरि करणे च तृतीया विभक्तिः प्रस्तौति ।
- सम्प्रदानकारकं प्रत्यभिजानाति। सम्प्रादनकारकस्य चतुर्थीविभक्तिः इति अपि जानाति। सूत्रस्याशयं सोदाहरणं समर्थयति।
- चतुर्थीविभक्तियुक्तानि पदानि प्रत्यभिजानाति। नूतनसन्दर्भे प्रयुङ्क्ते च
- अपादानकारकं प्रत्यभिजानाति। संज्ञाविधायकसूत्रं, पञ्चमीविभक्तिविधायकसूत्रं च सोदाहरणं लिखति। शुद्धप्रयोगं करोति।
- अधिकरणकारकं प्रत्यभिजानाति। संज्ञासूत्रं विभक्तिविधायकं सूत्रं च पठति, लिखति।
- त्रिषु भेदेषु अधिकरणकारकं प्रयुङ्क्ते।

## अधिकविस्तर:

# ബാലപ്രബോധനം



**വെള്ളം ജടാന്തേ ബിഭ്രാണം**
**വെള്ളിമാമലവിഗ്രഹം**
**വെള്ളൂരമർന്ന ഗൗരീശ-**
**മുള്ളിലൻപൊടു ചിന്തയേ**

**കർത്തൃകർമ്മക്രിയാഭേദം**
**വിഭക്ത്യർത്ഥാന്തരങ്ങളും**
**ഭാഷയായിഹ ചൊല്ലുന്നേൻ**
**ബാലന്മാരറിവാനഹം**

1. ബാലപ്രബോധനം എന്ന ഗ്രന്ഥം രചിക്കാൻ ഗ്രന്ഥകാരൻ ആരംഭിക്കുന്നു. ഗ്രന്ഥത്തിന്റെ നിർവിഘ്നപരിസമാപ്തിക്കായി തന്റെ ഇഷ്ടദേവതയായ ഭഗവാൻ പരമശിവന്റെ ധ്യാനരൂപമായ മംഗളം ആചരിക്കുകയും ശിഷ്യശിക്ഷയ്ക്കായി (ശിഷ്യന്മാരും ഇപ്രകാരം ചെയ്യേണ്ടതാണെന്ന് മനസ്സിലാക്കിക്കൊടുപ്പാനായി) ഗ്രന്ഥത്തിൽ ചേർത്തുപറയുകയും ചെയ്യുന്നു. **വെള്ളം** - ഗംഗാജലത്തെ, **ജടാന്തേ** = ജടാമദ്ധ്യത്തിൽ, **ബിഭ്രാണം** = ധരിക്കുന്നവനായ ( ഈ വിശേഷണം കൊണ്ട് സർവ്വശക്തനാണെന്ന് പ്രകാശിപ്പിക്കുന്നു). വെള്ളിമാമലവിഗ്രഹം = സർവ്വാംഗം ഭസ്മോദ്ധൂളനംകൊണ്ട് കൈലാസപർവ്വതം പോലെ വെളുത്ത ശരീരത്തോടു കൂടിയ, സർവ്വ വിഭൂതി നിധിയാണെന്നു സൂചിപ്പിക്കുന്നു.) **വെള്ളൂരമർന്ന** = വെള്ളൂർ എന്ന ദേശത്ത് വർത്തിക്കുന്ന (താൻ സർവ്വദാ സേവിച്ചുവരുന്ന പരദേവതയാണ് ഭഗവാൻ എന്നു സൂചിപ്പിക്കുന്നു.) **ഗൗരീശം** = ഉമാകാന്തനെ(സന്തുഷ്ടനായി പ്രസന്നമുഖനായിരിക്കുന്ന സന്ദർഭമാണെന്ന് സൂചിപ്പിക്കുന്നു. പ്രഭുവിനെ നല്ല സമയം നോക്കി സേവിച്ചാലാണല്ലോ സേവ പൂർണ്ണ ഫലപ്രദമായി ഭവിക്കുക.) **ഉള്ളിൽ** = മനസ്സിൽ, **അൻപൊട്** = ഭക്തിയോടുകൂടി (അൻപ് എന്നതിന് സ്നേഹം എന്നർത്ഥം. സ്നേഹം ഗുരുദേവാദി പൂജാവിഷയമായാൽ അതിനെ ഭക്തി എന്നും കാന്താദിവിഷയമായാൽ അതിനെ അനുരാഗമെന്നും, ശിഷ്യപുത്രാദി വിഷയമായാൽ വാത്സല്യമെന്നും പറയും. ഭക്തിയോടുകൂടി സേവിച്ചാൽ മാത്രമേ സേവയ്ക്കു ഫലം ലഭിക്കുകയുള്ളൂ.) **ചിന്തയേ** = ഞാൻ ധ്യാനിക്കുന്നു.

2. ഈ ഗ്രന്ഥത്തിൽ പറയാൻ പോകുന്ന വിഷയമെന്തെന്ന് അടുത്ത ശ്ലോകം കൊണ്ട് പറയുന്നു. **കർത്താവ്, കർമ്മം, ക്രിയ** ഇവയുടെ ഭേദവും വിഭക്തികളുടെ അർത്ഥഭേദങ്ങളും കുട്ടികളുടെ അറിവിലേക്കായി മലയാള ഭാഷയിൽ പറയുന്നുണ്ട്.



**ശബ്ദം രണ്ടുവിധം പ്രോക്തം**
**തിങന്തം ച സുബന്തവും**
**രണ്ടു ജാതി സുബന്തേ ചാ-**
**പ്യജന്തം ച ഹലന്തവും**

**ലിങ്ഗം മുമ്മൂന്നൂ രണ്ടിനും**
**വരും പുല്ലിംഗമാദിയിൽ.**

**സ്ത്രീലിങ്ഗം മദ്ധ്യഭാഗേ സ്യാ-**
**ദൊടുക്കത്തു നപുംസകം.**

**വൃക്ഷോ ജായാ കുണ്ഡമിതി**
**രൂപഭേദമജന്തകേ**
**ഗോധുക്പൂർവ്വമുപാനച്ച**
**വാശ്ശബ്ദോ ƒപി ഹലന്തകേ**



3. **തിങന്തം, സുബന്തം** എന്നു ശബ്ദം രണ്ടുവിധമാണെന്ന് പറയപ്പെട്ടിരിക്കുന്നു. സുബന്തത്തിലും **അജന്തം ഹലന്തം** എന്ന് രണ്ട് ജാതിയുണ്ട്

4. അജന്തം ഹലന്തം എന്ന രണ്ടു ജാതി സുബന്തങ്ങൾക്കും മുമ്മൂന്ന് ലിങ്ഗങ്ങളുണ്ട്. അവ **പുല്ലിങ്ഗം സ്ത്രീലിങ്ഗം, നപുംസകലിങ്ഗം** എന്നിവയാകുന്നു.

5. അജന്തപദങ്ങളിൽ **വൃക്ഷഃ ജായാ, കുണ്ഡം** എന്നിങ്ങനെ ക്രമത്തിൽ പുല്ലിംഗത്തിലും സ്ത്രീലിങ്ഗത്തിലും നപുംസകലിങ്ഗത്തിലും രൂപഭേദം വരും. ഹലന്തങ്ങളിൽ **ഗോധുക് ഉപാനത്, വാഃ** എന്നിങ്ങനെ രൂപഭേദം.

**പ്രഥമൈകാർത്ഥവചനം**
**നോക്കിയന്തം ഗ്രഹിക്കുക.**
**അജന്തേഷു, ഹലന്തേഷു**
**ബഹവർത്ഥവചനങ്ങളാൽ.**

**അകാരാന്താദിയായുള്ള**
**ശബ്ദങ്ങൾക്കു യഥോചിതം**
**വിഭക്തിഭേദാദർത്ഥങ്ങൾ**
**ചൊല്ലുന്നു പല ജാതിയും**

**പ്രഥമാ ച ദ്വിതീയാ ച**
**തൃതീയാ ച ചതുർത്ഥ്യപി.**
**പഞ്ചമീ ഷഷ്ഠിയും സപ്ത-**
**മ്യേവമേഴു വിഭക്തികൾ**


6. അജന്തനാമങ്ങളിൽ മിക്കവാറും പ്രഥമൈകവചനം നോക്കി അന്തം മനസ്സിലാക്കാം.

ഉദാഹരണം: **ബാലഃ** എന്നത് അകാരാന്തം, **ഹരിഃ**- ഇകാരാന്തം, **കന്യാ** - ആകാരാന്തം. **പിതാ, ധാതാ** മുതലായവ ഋകാരാന്തങ്ങളിലും **ഗൌഃ** മുതലായവ ഓകാരാന്തങ്ങളിലും പ്രഥമൈകവചനത്തിന്റെ സ്വരൂപം കൊണ്ട് അന്തം മനസ്സിലാകുന്നില്ല. അതുകൊണ്ട് ഇത് പ്രായികമാണ്. സാർവ്വത്രികമല്ല. ഹലന്ത നാമങ്ങളിൽ ബഹുവചനരൂപം കൊണ്ട് അന്തം മനസ്സിലാക്കാം.

ഉദാ: **ഗോദുഹഃ ഭിഷജഃ രാജാനഃ** ഇവയിൽ അന്തം സ്പഷ്ടമാകുന്നു.

7. അകാരാന്തം, ആകാരാന്തം ഇത്യാദിയായിട്ടുള്ള ശബ്ദങ്ങൾക്ക് പ്രഥമാ, ദ്വിതീയാ ഇത്യാദി വിഭക്തിഭേദം കൊണ്ട് യോജിപ്പുപോലെ പലവിധത്തിൽ അർത്ഥം പറയുന്നു.

8. **പ്രഥമാ, ദ്വിതീയാ, തൃതീയാ, ചതുർത്ഥീ, പഞ്ചമീ, ഷഷ്ഠീ, സപ്തമീ** എന്നിങ്ങനെ വിഭക്തികൾ ഏഴാകുന്നു.



**ഇവറ്റിന്നിഹ വെവ്വേറെ**
**മുമ്മൂന്നു വചനം വരും**
**എകദ്വിബഹുമുൻപായി**
**വചനം മൂന്നിഹ ക്രമാത്**
**ഒരുത്തനിരുവർ പിന്നെ**
**പലരെന്നർത്ഥമായ് വരും**
**പ്രഥമായാ ഭേദമത്രേ**
**മുറ്റും സംബോധനാഭിധാ.**

9. ഈ ഏഴു വിഭക്തികൾക്കും **ഏകവചനം, ദ്വിവചനം, ബഹുവചനം** എന്നു മുമ്മൂന്ന് വചനങ്ങൾ ഉണ്ട്.

10. ഇവയ്ക്ക് ക്രമത്തിൽ **ഒരുത്തൻ, രണ്ടുപേർ, പലർ** എന്നർത്ഥം വരും. സംബോധന എന്നത് പ്രഥമാ വിഭക്തിയുടെ വകഭേദം തന്നെയാകുന്നു മറ്റൊരു വിഭക്തിയല്ല.

**അതെന്നു പ്രഥമയ്ക്കർത്ഥം**
**ദ്വിതീയയ്ക്കതിനെ പുനഃ**
**അതിനോടതിലേക്കെന്നും**
**ദ്വിതീയയ്ക്കർത്ഥമായ് വരും.**
**തൃതീയാഹേതുവായിട്ടു**
**കൊണ്ടാലോടൂടെയെന്നപി**
**ആയിക്കൊണ്ടു ചതുർത്ഥീച**
**സർവ്വത്ര പരികീർത്തിതാ**
**അതിൽനിന്നതിനേക്കാളും**
**ഹേതുവായിട്ടു പഞ്ചമീ.**

11. **അത്** എന്ന് (**അവൻ. അവൾ. അത്** എന്നിങ്ങനെ) പ്രഥമാ വിഭക്തിക്ക് അർത്ഥം വരും. ദ്വിതീയാ വിഭക്തിയ്ക്ക് അതിനെ എന്നർത്ഥം വരും. അതിനോട്, അതിലേക്കെന്നും ദ്വിതീയയ്ക്ക് അർത്ഥം വരാം. തൃതീയയ്ക്ക് ഹേതുവായിട്ട് **കൊണ്ട് ആൽ, ഓട്, ഊടെ** എന്നർത്ഥം വരും.

12. ചതുർത്ഥിക്ക് എല്ലാ ദിക്കിലും **'ആയിക്കൊണ്ട്'** എന്നർത്ഥമാകുന്നു. **അതിൽനിന്ന്, അതിനേക്കാൾ ഹേതുവായിട്ട്** എന്നിവ പഞ്ചമ്യർത്ഥങ്ങൾ.

**ഇക്കുമിന്നുമുടെ ഷഷ്ഠി-**
**ക്കതിന്റെ വച്ചുമെന്നപി-**
**അതിങ്കലതിൽ വച്ചെന്നും**
**വിഷയം സപ്തമീ മതാ**

13. ഷഷ്ഠിക്ക് **ഇക്ക്, ഇന്ന്, ഉടെ, ന്റെ, അതിൽവച്ച്** എന്ന് അർത്ഥങ്ങൾ വരും. **അതിങ്കൽ, അതിൽവച്ച്,** അതു **വിഷയമായി** എന്നിങ്ങനെ സപ്തമ്യർത്ഥങ്ങൾ വരും.

**പദച്ഛേദം ചെയ്തു മുൻപേ**
**വിഭക്തികളറിഞ്ഞുടൻ.**

**അങ്ങുമിങ്ങുമിരിക്കുന്ന**
**പദങ്ങളെ യഥോചിതം**
**ചേരുന്ന പടി ചേർക്കുന്ന-**
**തന്വയം പരികീർത്തിതം**
**കർത്താ, കർമ്മം, ക്രിയാ മൂന്നു-**
**മന്വയത്തിങ്കൽ മൂന്നിവ**

14–15. ആദ്യമായി പദം മുറിച്ചിട്ട് വിഭക്തികൾ മനസ്സിലാക്കിയിട്ട് ശ്ളോകങ്ങളിൽ അന്വയക്രമത്തിലല്ലാതെ മുൻപും പിൻപുമിരിക്കുന്ന പദങ്ങളെ യഥോചിതം, അതായത് ഓരോ പദത്തിനും ക്രിയയോടുള്ള ബന്ധത്തിന്റെ താരതമ്യമനുസരിച്ച് യോജിപ്പുപോലെ ചേർക്കുന്നതാണ് അന്വയം എന്നു പറയപ്പെടുന്നത്. കർത്താവ്, കർമ്മം, ക്രിയ ഇവ മൂന്നും അന്വയത്തിൽ ആദ്യം വരുന്നു.



**കർത്താ ചെയ്യുന്നവൻ, കർമ്മ-**
**മവനിച്ഛിച്ചതായ് വരും.**
**കർത്താവിന്നിഹ കർമ്മത്തോ-**
**ടുള്ള ബന്ധം ക്രിയാപദം.**
**കർത്താ പ്രഥമയാകുമ്പോൾ**
**ദ്വിതീയാ കർമ്മമായ് വരും**
**തിങന്തം ക്രിയയായീടും**
**ചിലേടത്തു സുബന്തവും.**
**തൃതീയാ കർത്താവാകുമ്പോൾ**
**കർമ്മം പ്രഥമയായ് വരും**
**സുബന്തം വാ തിങന്തം വാ**
**ക്രിയാ, തത്രാത്മനേപദം.**
**തൃതീയാ കർത്താവായീടും**
**ഭാവേ കർമ്മങ്ങളില്ലപോൽ**
**സുബന്തം താൻ തിങന്തം വാ**
**ക്രിയാ തത്രാത്മനേപദം.**

16. കർത്താവ് ചെയ്യുന്നവൻ. അവൻ ക്രിയമൂലം ബന്ധപ്പെടാൻ ഇച്ഛിച്ചതു കർമ്മം. കർത്താവിനു കർമ്മത്തോടുള്ള ബന്ധത്തെ കുറിക്കുന്ന പദം ക്രിയാപദം.

17. കർത്താവ് പ്രഥമയായാൽ കർമ്മം ദ്വിതീയയായിരിക്കും. സാധാരണയായി **തിങന്തം** ക്രിയയായിരിക്കും. ചില ദിക്കിൽ **സുബന്തവും** ക്രിയയായി പ്രയോഗിക്കാറുണ്ട്.

ഇത് **കർത്തരി** **പ്രയോഗം.**

18. കർത്താവ് തൃതീയയാകുമ്പോൾ കർമ്മം പ്രഥമയായിരിക്കും. തിങന്തമോ സുബന്തമോ ആണ് ക്രിയ. തിങന്തമാണെങ്കിൽ **ആത്മനേപദം** തന്നെയായിരിക്കും. ഇത് കർമ്മണി പ്രയോഗം.

19. ഭാവേപ്രയോഗത്തിൽ കർത്താവ് **തൃതീയയായിരിക്കും**. കർമ്മം ഉണ്ടായിരിക്കുകയില്ല. ക്രിയ സുബന്തമോ തിങന്തമോ ആകാം. അവിടെയും തിങന്തമെങ്കിൽ ആത്മനേപദമേ ആകാവൂ.

**വിശേഷ്യം തു പ്രധാനം സ്യാ-**
**ദപ്രധാനം വിശേഷണം.**

20. വാക്യത്തിൽ വിശേഷ്യം പ്രധാനവും വിശേഷണം അപ്രധാനവും ആകുന്നു.

**ധാതു രണ്ടുവിധം പ്രോക്തം**
**സകർമ്മകമകർമ്മകം.**

21. **സകർമ്മകം അകർമ്മകം** എന്ന് ധാതുക്കൾ രണ്ടുവിധം. കർമ്മമുളളത് **'സകർമ്മകം'**കർമ്മമില്ലാത്തത് **അകർമ്മകം**.

**ലട്ടും ലങ്ങും ലോട്ടും ലിങ്ങും**
**ലിട്ടും ലുങ്ങും തഥൈവ ച.**
**ലുട്ടും ലൃങ്ങും ലൃട്ടും ലേട്ടും**
**ലകാരം പത്തിവ ക്രമാൽ**
**ആശിർലിങ്ങ് ലിങ്ങിലെ ഭേദം**
**കാലഭേദമഥോച്യതേ.**
**ലട്ടിയക്കത്തിൽ വന്നീടും**
**ലങ് ലുങ് ലിട്ടുകൾ പോയതിൽ**
**ചെയ്ക, പോക, വരുതാക**
**എന്നിത്യാദിഷു ലിങ് ലോട്ടുകൾ**
**ലുട്ടും ലൃട്ടും ഭാവികാലം**
**കാണിപ്പൂ ലൃങ്ങ്ലകാരവും**
**ക്രിയയുണ്ടാവതില്ലെന്നൊ-**
**ർത്ഥം തോന്നുന്നതാകിലോ.**
**കാര്യകാരണഭാവത്തിൽ**
**ഭൂതഭാവികളിൽ വരും.**
**ആശംസാർത്ഥം കുറിച്ചീടാൻ.**
**ആശീർലിങ് കണ്ടുകൊൾകെടോ**

**ലട്ട്, ലങ്ങ്, ലോട്ട്, ലിങ്, (വിധിലിങ്, ആശീർലിങ്) ലിട്ട്, ലുങ് ലുട്ട്, ലൃട്ട്, ലൃങ്, ലേട്ട്** ഇങ്ങനെ ലകാരങ്ങൾ പത്താകുന്നു. **ആശീർലിങ്** ലിങ്ങിന്റെ ഒരു വിഭാഗമാകുന്നു. **ലേട്ട്** വേദത്തിൽ മാത്രം പ്രയോഗിക്കപ്പെടുന്ന ലകാരമാകുന്നു. **ലട്** വർത്തമാനകാലത്തെ കുറിക്കുന്നതാണ് ലങ്,ലുങ്,ലിട്ട് ഇവ ഭൂതകാലത്തിൽ വരും **ലിങ്, ലോട്ട്** ഇവ **വിധി ആശിസ്, അനുജ്ഞ, പ്രാർത്ഥന** മുതലായ അർത്ഥവിശേഷങ്ങളെക്കുറിക്കുന്നു. **ലുട്ട്, ലൃട്ട്,** ഇവ ഭാവികാലത്തെക്കുറിക്കുന്നവയാണ്. ഹേതുഹേതുമദ്ഭാവത്തിൽ ഭൂതത്തിലും ഭാവിയിലും **ലൃങ്** പ്രയോഗിക്കപ്പെടുന്നു. അവിടെ ക്രിയയുടെ അനിഷ്പത്തികൂടി സൂചിപ്പിക്കപ്പെടും. ആശംസാർത്ഥത്തിൽ ആശീർലിങ് പ്രയോഗിക്കപ്പെടുന്നു.

**പരസ്മൈപദവും പിന്നെ**
**ആത്മനേപദവും തദാ**

**ഓരോന്നാകിലുമാകാം, പിന്നെ**
**ചിലേടത്തു യഥാവിധി.**
**ഓരോന്നിന്നിഹ വെവ്വേറെ**
**വർഗ്ഗം മുമ്മൂന്നു വന്നിടും**
**പ്രഥമപുരുഷ: പൂർവ്വം**
**മദ്ധ്യമപുരുഷ: പുന:**
**ഉത്തമപുരുഷശ്ചേതി**
**വർഗ്ഗം മൂന്നിവ രണ്ടിലും**
**ഓരോന്നിന്നിഹ വെവ്വേറെ**
**മുമ്മൂന്നു വചനം വരും.**
**എകദ്വിബഹുമുമ്പായി**
**വചനം മൂന്നിഹ ക്രമാത്.**

ധാതുക്കൾക്ക് **പരസ്മൈപദം, ആത്മനേപദം** എന്നു രണ്ട് വിധം രൂപങ്ങൾ ഉണ്ട്. ചില ധാതുക്കൾ പരസ്മൈപദവും ആത്മനേപദവും ഉള്ളവയാണ്. ചിലതിന് പരസ്മൈപദം മാത്രവും മറ്റു ചിലതിന് ആത്മനേപദം മാത്രവും ഉണ്ടായിരിക്കും. ചില ദിക്കിൽ വിശേഷ വിധിയനുസരിച്ച് പദവ്യത്യാസവും വരും. ഉദാ:-'ജി' ധാതുപരസ്മൈപദിയാണെങ്കിലും **വി, പരാ,** എന്നീ ഉപസർഗ്ഗങ്ങളുടെ യോഗത്തിൽ ആത്മനേപദിയാകുന്നു. 'വിജയതേ' 'പരാജയതേ' രമ്ധാതു ആത്മനേപദിയാണെങ്കിലും **വി, ആങ്, പരി, ഉപ** ഇവ ചേർക്കുമ്പോൾ പരസ്മൈപദിയാകുന്നു. **വിരമതി, ആരമതി, പരിരമതി, ഉപരമതി.** പരസ്മൈപദത്തിനും ആത്മനേപദത്തിനും വെവ്വേറെ **പ്രഥമപുരുഷൻ, മദ്ധ്യമപുരുഷൻ, ഉത്തമപുരുഷൻ** എന്ന് മൂന്നു പുരുഷനും ഓരോ പുരുഷനും എകവചനം, ദ്വിവചനം, ബഹുവചനം എന്നു വചനങ്ങളും വരും.

**മദ്ധ്യമൻ വരുമേടത്ത്**
**യുഷ്മത്തുകൾ വരും ക്രമാത്**
**ഉത്തമൻ വരുമേടത്ത്**
**അസ്മത്തുക്കൾ വരുന്നിതു**
**മറ്റുള്ളേടത്തു പ്രഥമ-**
**പുരുഷൻ വരുമെപ്പോഴും**
**തന്റെ തന്റെ സമത്തോടു**
**കൂടുമത്രേ വിഭക്തികൾ**
**വചനങ്ങളുമവ്വണ്ണം**
**തഥാ ലിങ്ഗങ്ങളും വരും.**

മദ്ധ്യമപുരുഷൻ വരുന്ന ദിക്കിൽ **യുഷ്മച്ഛബ്ദരൂപങ്ങൾ** വരുന്നതാണ്. ഉത്തമപുരുഷൻ വരുന്ന ദിക്കിൽ **അസ്മച്ഛബ്ദ** രൂപങ്ങളും വരും. മറ്റുള്ള സ്ഥലങ്ങളിൽ പ്രഥമപുരുഷൻ വരും. വിശേഷണത്തിന്റെയും വിശേഷ്യത്തിന്റെയും **വിഭക്തി, ലിങ്ഗം, വചനം** എന്നിവ ഒന്നായിരിക്കും.

**യച്ഛബ്ദം കാണുമേടത്ത്**
**തച്ഛബ്ദം കൂടെ വന്നിടും**

**യച്ഛബ്ദം** കാണുന്ന ദിക്കിൽ **തച്ഛബ്ദം** കൂടിവരും. (അപൂർണ്ണം)

# द्वितीयो भागः

## तर्कसंग्रहः

काणादं पाणिनीयञ्च

सर्वशास्त्रोपकारकम् ।।

# आमुखम्

वेदाः भारतीयविद्यानाम् आधारभूताः भवन्ति। चत्वारो वेदाः सन्ति। ततः दर्शनचिन्तापद्धतिः प्रसृता। दृश्यते,प्रपञ्चतत्त्वं साक्षात्क्रियते अनेन इति दर्शनम्। भारतीयदर्शनानि द्विविधानि आस्तिकानि नास्तिकानि च। वेदानां प्रामाणिकतां यानि अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। तदितराणि नास्तिकदर्शनानि च।

आस्तिकदर्शनानां तथा तेषां दर्शनकाराणां च नामानि अधः पट्टिकायां दीयन्ते।

| दर्शनानि | दर्शनकाराः |
|---|---|
| सांख्यम् | कपिलः |
| योगः | पतञ्जलिः |
| न्यायः | गौतमः |
| वैशेषिकम् | कणादः |
| पूर्वमीमांसा (मीमांसा) | जैमिनिः |
| उत्तरमीमांसा (वेदान्तः) | बादरायणः |

नास्तिकदर्शनानां तथा तेषां दर्शनकाराणां च नामानि अधः पट्टिकायां दीयन्ते।

| दर्शनानि | दर्शनकाराः |
|---|---|
| चार्वाकम् | बृहस्पतिः |
| | बौद्धम् गौतमबुद्धः |
| जैनम् | महावीरः |

तेषु आस्तिकदर्शनेषु सर्वशास्त्रोपकारकत्वेन न्यायवैशेषिके विशिष्टे स्तः। वैशेषिकदर्शने प्रपञ्चे स्थितानां पदार्थानां निरूपणं विद्यते। तेषां पदार्थानां प्रमाणपरीक्षणं न्यायशास्त्रस्य प्रधानविषयः भवति। आस्तिकदर्शनेषु प्रथितयोः न्यायवैशेषिकयोः दर्शनयोः सिद्धान्तानां समञ्जससम्मेलनेन कालान्तरे आविर्भूतं दर्शनं तर्कशास्त्रमित्युच्यते।

बहुप्रकारेण विकसितं तर्कशास्त्रम् आधुनिके कालेऽपि नितराम् अपेक्षितं भवति। बालानां तत्र प्रवेशः दुष्करः इति मत्वा अन्नंभट्टो नाम आचार्यः तर्कसंग्रहनामकस्य ग्रन्थस्य रचनां कृतवान्। ग्रन्थस्यास्य केचन अंशाः अस्माकं पाठ्यविषयाः भवन्ति।

# तर्कसंग्रहः

## मङ्गलश्लोकः

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**
**बालानां सुखबोधाय क्रियते तर्कसंग्रहः।।**

***टिप्पणी***

ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरति। मङ्गलं नाम देवतानमस्कारः । शिष्याः अपि एवं कुर्युः इति ग्रन्थादौ निबध्नाति । श्लोकस्य अयम् अर्थः-

| | | |
|---|---|---|
| विश्वेशं | - | जगन्नियन्तारम् |
| हृदि | - | मनसि |
| निधाय | - | नितरां स्थापयित्वा (ध्यानं कृत्वा), |
| गुरूवन्दनं | - | आचार्याणाम् (गौतमकणादप्रभृतीनाञ्च) नमस्कारम् |
| विधाय | - | कृत्वा, |
| बालानां | - | ग्रहणधारणपटूनां (एतच्छास्त्रजिज्ञासूनाम्) |
| सुखबोधाय | - | अनायासेन ग्रहणाय |
| तर्कसंग्रहः | - | नाम अयं ग्रन्थः (तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादयः पदार्थाः, तेषां संग्रहः) |
| क्रियते | - | विरच्यते। |

अस्य तर्कशास्त्रस्य प्रतिपादनरीतिः त्रिधा भवति। उद्देशः लक्षणं परीक्षा चेति। नाम्ना वस्तुसङ्कीर्तनम् उद्देशः। असाधारणधर्मकथनं लक्षणम्। उद्दिष्टं लक्षणं लक्ष्ये युज्यते वा न वा इति परिचिन्तनं परीक्षा। उद्देशस्य प्रयोजनं पदार्थज्ञानम्। इतरेभ्यः भेदज्ञानं लक्षणस्य प्रयोजनम्। लक्षणे दोषपरिहारः परीक्षायाः प्रयोजनम्।

# उद्देशप्रकरणम्।

## पदार्थाः

***तर्कसंग्रहः***

**द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः।**

***टिप्पणी***

पदस्यार्थः पदार्थः। वाच्यः अभिधेयो वा पदार्थः। वाच्यत्वमभिधेयत्वं वा पदार्थसामान्यलक्षणम्। तच्च पदशक्तिविषयत्वम्। पदश्रवणेन जायमानः बोधविषयः वस्तु एव सः। द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावः इति पदार्थाः सप्त एव।

## द्रव्याणि

***तर्कसंग्रहः***

**तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।**

***टिप्पणी***

पृथिवी, आपः, तेजः, वायुः, आकाशं, कालः, दिक्,आत्मा, मनः इति द्रव्याणि नवैव। अत्र नवशब्दः संख्यावाचकः। विभक्तेभ्यः नवभ्यः भिन्नं द्रव्यं नास्ति इति बोधयति। गुणवत्त्वं द्रव्यसामान्यलक्षणम्।

## गुणाः

***तर्कसंग्रहः***

**रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व - गुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः चतुर्विंशतिः गुणाः।**

*टिप्पणी*

गुणाः चतुर्विंशतिः। गुणाः द्रव्यवृत्तयः। द्रव्यकर्मभिन्नत्वे सति सत्तावत्त्वं गुणसामान्यलक्षणम्। रूपं, रसः, गन्धः, स्पर्शः, संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वं, द्रवत्वं, स्नेहः, शब्दः, बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः इति चतुर्विंशतिः गुणाः। तत्र मृदुत्वकठिनत्वादयः अपि गुणा इति केचन।अवयवसंयोगविशेषादेव मृदुत्वकठिनत्वादयः गृह्यन्ते न अन्यथा। अतः निर्दिष्टेभ्यः गुणेभ्यः भिन्नाः गुणाः न सन्ति इति चतुर्विंशतिपदं बोधयति।

## कर्माणि

*तर्कसंग्रहः*

**उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि।**

*टिप्पणी*

कर्म नाम क्रिया। तत् पञ्चविधम्। उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् चेति।

## सामान्यम्

*तर्कसंग्रहः*

**परमपरञ्चेति द्विविधं सामान्यम्।**

*टिप्पणी*

समानानां भावः सामान्यम्। यथा सर्वेषु घटेषु घटत्वं सामान्यम्। सर्वेषु पटेषु, पटत्वम्। तच्च द्विविधं परम् अपरं चेति।

## विशेषः

*तर्कसंग्रहः*

**नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ताः एव।**

*टिप्पणी*

पृथिवीजलतेजोवायूनां परमाणवः, आकाशं, कालः, दिक् आत्मा, मनश्च नित्यद्रव्याणि।

तेषु विशेषाः वर्तन्ते। नित्यद्रव्याणि अनन्तानि इति विशेषाः अपि अनन्ताः- अपरिमेयाः। प्रत्येकस्मिन् नित्यद्रव्ये विशेषस्य सत्वात्।

## समवायः

***तर्कसंग्रहः***

**समवायस्त्वेक एव।**

***टिप्पणी***

विभागरहितः नित्यसम्बन्धः समवायः। समवायः एकः एव। समवायस्य भेदो नास्तीत्याह।

## अभावः

***तर्कसंग्रहः***

**अभावश्चतुर्विधः- प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति।**

***टिप्पणी***

न भावः अभावः। अभावः इति पृथक् पदार्थः इति वैशेषिकमतम्। स चतुर्विधः। पदार्थान् विभज्य सम्प्रति लक्षणप्रकरणेन सह परीक्षाप्रकरणमारभते । लक्षणं चासाधारणो धर्मः। व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्। व्यावृत्तिः इतरभेदज्ञानम्। लक्षणे दोषपरिहारः परीक्षा। लक्षणे अव्याप्तिः, अतिव्याप्तिः, असम्भवः इति त्रयो दोषाः न स्युः। दोषत्रयशून्यो धर्म एव लक्षणं भवति। यथा गोः लक्षणमुच्यते इति लक्ष्याः गावः।

१, कासुचन गोव्यक्तिषु कपिलवर्णं (पिङ्गलवर्णं) दृष्ट्वा गोः लक्षणं कपिलवर्णत्वमुच्यते चेत् तर्हि लक्षणमिदम् अव्याप्तिदूषितं स्यात्। अव्याप्तिलक्षणञ्च लक्ष्यैकदेशावृत्तित्वम्। लक्ष्याः गावः, तदेकदेशाः श्वेतत्वनीलत्वादिवर्णयुक्ताः गावः, तासु कपिलवर्ण रूपलक्षणस्यावृत्तित्वादिति लक्षणसमन्वयः।

२, लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वम् अतिव्याप्तिः। यथा- गोः श्रृङ्गित्वम्। लक्ष्येषु गोषु वृत्तित्वे सति अलक्ष्येषु अजादिषु वृत्तित्वादतिव्याप्तिरिति।

३, यो धर्मः लक्ष्येषु कुत्रापि न दृश्यते सोऽयं धर्मः यदि लक्षणमुच्यते तदा असम्भवो नाम दोषः। लक्ष्यमात्रावर्तनमसम्भवः इति तस्य लक्षणम्। यथा गोः एकशफवत्वम्। गवि न कदापि एकशफत्वं, सर्वा गावः द्विशफा एव। एतद्दूषणत्रयरहितः गोषु दृश्यमानः धर्मः  सास्नादिमत्वम्। अतः सास्नादिमत्त्वधर्मः गोः असाधारणधर्मः। तदेव लक्षणम्। सोऽयं धर्मः व्यावर्तकः, इतरभेदज्ञानं जनयति। लक्षणघटकदलानां अव्याप्त्यादिवारकतया प्रयोजनं वक्तव्यम्।

उद्देशखण्डः समाप्तः।

# द्रव्यनिरूपणम्।

## पृथिवी

*तर्कसंग्रहः*

**तत्र गन्धवती पृथिवी। सा द्विविधा नित्या अनित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा- शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।**

*टिप्पणी*

पदार्थेषु पृथिव्याः लक्षणमुच्यते। गन्धवत्त्वं पृथिव्याः लक्षणम्। गन्धवत्त्वं नाम गन्धः। अनेन लक्षणेन पृथिवी जलादिभ्यः विविच्य ज्ञायते। क्वचित् वायौ सौरभ्यम् उपलभ्यते। सुरभिः पवनः इति प्रतीतिः। तथा च गन्धवत्त्वलक्षणस्य पवने अतिव्याप्तिः स्यात् इति न आशङ्कनीया। वायुना आनीतं सौरभं तदानीं पृथिव्याः एव, न तु पवनस्य। पृथिव्याः भेदः उच्यते। नित्या पृथिवी अनित्या पृथिवी इति पृथिवी द्विविधा। नित्यत्वं नाम उत्पत्तिनाशरहितत्वम्। अनित्यत्वं नाम उत्पत्तिनाशवत्त्वम्। परमाणुरूपा पृथिवी नित्या। परमाणुः चरमावयवः। तत्स्वरूपं च-

**वायुना आनीतं सौरभं पवनस्य वा?**

जालसूर्यमरीचिस्थं यत्सूक्ष्मं दृश्यते रजः।
तस्य षष्ठस्तु यो भागः परमाणुः स उच्यते।।

कार्यं- जन्यम्। कार्यरूपा पृथिवी अनित्या। कार्यरूपां पृथिवीं विभजते पुनस्त्रिविधेति।

आत्मनो भोगाश्रयं शरीरम्। सुखदुःखान्यतरसाक्षात्कारः भोगः। अस्मदादीनां शरीरं पार्थिवम्। भोगसाधनं करणमिन्द्रियम् - घ्राणम् - गन्धग्राहकं नासिकायाः अग्रे वर्तते। रसनादौ अतिव्याप्तिवारणाय गन्धग्राहकमिति। घ्राणमिति इन्द्रियनामधेयम्। नासाग्रे इति स्थाननिर्देशः। गन्धग्रहणं प्रयोजनम्। विषयाः - मृत्पाषाणादयः।

# आपः

### *तर्कसंग्रहः*

**शीतस्पर्शवत्यः आपः। ताः द्विविधाः। नित्याः अनित्याः च। नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः। पुनः त्रिविधाः। शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकंरसनंजिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।**

### *टिप्पणी*

**शिलातले कथं शैत्यमनुभूयते ?**

अपां लक्षणमुच्यते शीतेति - शीतस्पर्शवत्त्वम् अपां- जलस्य लक्षणम्। स्त्रीलिङ्गस्य अप् शब्दस्य नित्यबहुवचनान्तत्वाद् आपः इति प्रयोगः। स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादयोऽपि स्पर्शवन्त इति तेषु अतिव्याप्तिः स्यात्। तत्परिहाराय शीत इति विशेषणपदम्। शीतस्पर्शः जले एव। शीतस्पर्शः शिलातलादिषु क्वचिदुपलभ्यते इति तत्रातिव्याप्तिरिति नाशङ्कनीया। शिलातलादिषु अपि जलसम्बन्धेनैव शैत्यमनुभूयते। कार्यरूपजलस्य त्रिविधो विभागः- शरीरेन्द्रियविषयभेदात्।

जलीयं शरीरं वरुणलोके प्रसिद्धम्। इन्द्रियं रसग्राहकं रसनं जिह्वायाः अग्रे वर्तते। जलीयविषयाः सरित्समुद्रादयः। आदिपदेन हिमकरकादीनां संग्रहः। त्वगादीन्द्रियेषु अतिव्याप्तिवारणाय रसग्राहकमिति।

# तेजः

### *तर्कसंग्रहः*

**उष्णस्पर्शवत् तेजः। तच्च द्विविधम्। नित्यमनित्यञ्च। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः। कृष्णताराग्रवर्ति। विषयश्चतुर्विधः। भौमदिव्योदर्याकरजभेदात्। भौमं वह्न्यादि। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुः उदर्यम्। आकरजं सुवर्णादि।**

### टिप्पणी

उष्णस्पर्शवत्त्वं तेजसः लक्षणम्। जलादौ अतिव्याप्तिवारणाय उष्णपदम्। शरीरेन्द्रियविषयभेदादिति विभागः कार्यरूपतेजसः। घ्राणादौ अतिव्याप्तिवारणाय रूपग्राहकमिति। तस्य विषयः चतुर्विधः। तत्र भूमौ भवं भौमं -तेजः। यथा वह्न्यादि प्रसिद्धम्। आपः इन्धनं यस्य तदबिन्धनम्। दिवि भवं दिव्यम्। अबिन्धनं दिव्यं च तेजः विद्युदादि। भुक्तस्य अन्नस्य परिणामः, जीर्णतातस्य हेतुभूतं तेजः उदर्यम्। उदरे भवं उदर्यम्। आकरात् जायते इति आकरजम्। आकरः खनिः। सुवर्ण, रजत, ताम्रादीनि आकरजतेजांसि।

**विषयः चतुर्विधः**
**भौमं, दिव्यम्, उदर्यम्, आकरजम्।**

## वायुः

### तर्कसंग्रहः

**रूपरहितस्पर्शवान् वायुः। सः द्विविधः। नित्यः अनित्यश्च। नित्यः परमाणुरूपः अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयः वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः । स च एकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।**

### टिप्पणी

रूपरहितत्वे सति स्पर्शवत्त्वं वायोः लक्षणम्। घटादौ अतिव्याप्तिवारणाय रूपरहितं इति विशेषणपदम्। आकाशादौ अतिव्याप्तिवारणाय स्पर्शवत्त्वमिति। विषयः वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। शरीरान्तःसञ्चारी इति ग्रहणं तु महावायौ अतिव्याप्तिवारणाय। मनसि अतिव्याप्तिवारणाय वायुः इति। शरीरान्तःसञ्चारिणः वायोः स्थानभेदेन अपानादि संज्ञान्तराणि। तानि उच्यन्ते-

हृदि प्राणः गुदेऽपानः समानो नाभिमण्डले।
उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ।। इति।

| इन्द्रियाणि | | | |
|---|---|---|---|
| इन्द्रियं | भूतद्रव्यं | विषयः (गुणः) | स्थानम्। |
| १. घ्राणम् | पृथिवी | गन्धः | नासाग्रम् |
| २. रसनम् | आपः(जलम्) | रसः | जिह्वाग्रं |
| ३. चक्षुः | तेजः | रूपं | कृष्णताराग्रं |
| ४. त्वक् | वायुः | स्पर्शः | सर्वशरीरः |
| ५. श्रोत्रं | आकाशः | शब्दः | कर्णविवरः |
| ६. मनः | (नित्यं) न भौतिकं | सुखादि | शरीरान्तः |

# आकाशः

***तर्कसंग्रहः***

**शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यञ्च।**

***टिप्पणी***

शब्दो गुणः यस्य तत् शब्दगुणकं, शब्दाश्रयः आकाशम्। अत्र गुणपदम् आकाशे शब्द एव विशेषगुणः इति बोधयति। तथा च समवायेन शब्दवत्त्वमात्रम् आकाशस्य लक्षणम्। अनेकत्वे मानाभावात् आकाशम् एकमेव। तत् विभु। विभुत्वं नाम सर्वमूर्तद्रव्यसंयोगित्वम्। आकाशस्य व्यापित्वात् सर्वाणि मूर्तद्रव्याणि आकाशे संयोगेन संबद्धानि इत्यर्थः। अत्रायं विवेकः-

१. भूतद्रव्याणि- पृथिवी, आपः, तेजः, वायुः, आकाशम् इति पञ्च। भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्।

२. मूर्तद्रव्याणि- पृथिवी, आपः, तेजः, वायुः, मनः इति पञ्च। मूर्तत्वं नाम परिच्छिन्नपरिमाणवत्त्वम्। अथवा क्रियावत्त्वम्।

३. विभुद्रव्याणि- आकाशः, कालः, दिक्, आत्मा इति चत्वारि। विभुत्वं नाम सर्वमूर्तद्रव्यसंयोगित्वम्।

# कालः

**तर्कसंग्रहः**

**अतीतादिव्यवहारहेतुः कालः। स चैको विभुः नित्यश्च।**

**टिप्पणी**

अतीत इत्यादिः यः व्यवहारः - अतीतः, आगतः अनागतः (भूतः, वर्तमानः, भविष्यः) इति ये व्यवहाराः। व्यवहारो नाम शब्दप्रयोगः तस्य हेतुः काल इत्यर्थः। अतीतादीति विशेषणदलस्य अभावे व्यवहारहेतुत्वमिति लक्षणं स्यात्। तथा च व्यवहारहेतुभूतेषु घटादिषु अतिव्याप्तिः। तद्वारणाय अतीतादि इति पदम्। कालः एक एव। आपेक्षिकः अतीतादि व्यवहारः।

**कालस्य विभागाः के?**

# दिक्

**तर्कसंग्रहः**

**प्राच्यादिव्यवहारहेतुः दिक्। सा च एका विभ्वी नित्या च।**

**टिप्पणी**

प्राच्यादिव्यवहारहेतुत्वं दिशः लक्षणम्। अत्र हेतुशब्दस्य असाधारणं कारणमित्यर्थः। घटादिषु अतिव्याप्तिवारणाय प्राच्यादि इति। उदयाचलसन्निहिता या दिक् सा प्राची। अस्ताचलसन्निहिता दिक् प्रतीची। मेरोः सन्निहिता उदीची। मेरोः व्यवहिता अवाची। इयं प्राची इयमवाची इत्यादिव्यवहारासाधारणं कारणं दिक् इत्यर्थः। एकस्य या प्राची सापरस्य प्रतीची स्यात् इति प्राच्यादयः न नियताः। व्यवहर्तुः स्थानमेव तत्र प्राच्यादिभेदे नियामकम् उपाधिभेद एव व्यवहारभेदे निमित्तम् इति अर्थः। एवं तस्याः एकत्वं विभुत्वं नित्यत्वञ्च सिद्ध्यति।

**दिशः विभागाः के?**

# आत्मा

### तर्कसंग्रहः

**ज्ञानाधिकरणमात्मा। स द्विविधः। जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नः विभुर्नित्यश्च।**

### टिप्पणी

आत्मनः लक्षणं ज्ञानाधिकरणत्वम्। तत्र अधिकरणपदम् आश्रयपरम्। ज्ञानाश्रयः आत्मा इत्यर्थः। विशेषणदलस्य अभावे आश्रयभूतेषु भूतलादिष्वतिव्याप्तिवारणाय ज्ञानेति। अतः ज्ञानाश्रयः इति। आत्मा द्विविधः- जीवात्मा परमात्मा चेति। नित्यज्ञानवानीश्वरः परमात्मा। जीवः अपि ज्ञानाधिकरणम्। तज्ज्ञानानां जन्यत्वादनित्यत्वम्। आत्मा विभुः नित्यश्च।

# मनः

### तर्कसंग्रहः

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः।**
**तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।**

### टिप्पणी

उपलब्धिः साक्षात्कारः।साधनं कारणम्। तथा च सुखदुःखाद्यात्म विशेषगुणसाक्षात्कारकारणत्वे सति इन्द्रियत्वं मनसः लक्षणम्। इन्द्रियमिति विशेष्यदलस्याभावे आत्ममनःसंयोगादयः सुखादिसाक्षात्कारकारणानि इति तेषु अतिव्याप्तिः। एवं विशेषणदलस्य अभावे इन्द्रियत्वम् इति लक्षणस्य चक्षुरादिषु अतिव्याप्तिः।

इति द्रव्यपरीक्षाप्रकरणम् ।



# पठनप्रवर्तनम्

- **अधः प्रदत्तयोः लक्षणयोः रेखाङ्कितपदस्य दलप्रयोजनं किमिति चर्चां कृत्वा टिप्पणिं लिखत।**

  अतीतादिव्यवहारहेतुः कालः

  सुखाद्युपलब्धिसाधनम् इन्द्रियं मनः।

- **गन्धवती पृथिवीति लक्षणे के के दोषाः परिहृताः इति चर्चां कृत्वा टिप्पणीं लिखत।**

# गुणलक्षणप्रकरणम्।

## रूपम्

**तर्कसंग्रहः**

**चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिश चित्रभेदात्सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।**

**रूपम् कतिविधम्?**

**टिप्पणी**

चक्षुरेव चक्षुर्मात्रम्। चक्षुर्मात्रेण ग्राह्यः चक्षुर्मात्रग्राह्यः। ग्राह्यत्वञ्च प्रत्यक्षविषयत्वम्। चक्षुर्भिन्नेन्द्रियाग्राह्यत्वं मात्रपदस्यार्थः। तथा च चक्षुरिन्द्रियभिन्नेन्द्रियाग्राह्यत्वे सति, चक्षुर्ग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणं भवति।

१. गुणत्वमिति यदि लक्षणं तर्हि रसादिषु अतिव्याप्तिः। अतः चक्षुर्ग्राह्यत्वे सति इत्युक्तम्।

२. चक्षुर्ग्राह्यत्वे सति गुणत्वं इत्युक्तौ संयोगे संख्यायां च अतिव्याप्तिः। अतः मात्रपदम्। चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सतीत्यर्थः। संयोगः संख्या च चक्षुर्भिन्नेन त्वगिन्द्रियेण गृह्यते। अतो न अतिव्याप्तिः।

३. चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सति गुणत्वमित्युक्तौ गुरुत्वादौ अतिव्याप्तिः। तस्य केनापि इन्द्रियेण अग्राह्यत्वात्। अतः चक्षुर्ग्राह्यत्वे सति इति।

४. गुणत्वम् इति अनुक्तौ रूपत्वे रूपाभावे च अतिव्याप्तिः। रूपत्वं , रूपाभावः च चक्षुर्मात्रग्राह्ये एव। यो गुणः यदिन्द्रियग्राह्यः तन्निष्ठा जातिः तदभावश्च तेनैव इन्द्रियेण गृह्यते इति न्यायः। तेन रूपं चक्षुर्ग्राह्यं चेत्, रूपत्वजातिः, रूपाभावश्च तथा चक्षुर्ग्राह्यौ एव। अतः तद्वारणाय गुणत्वमिति।

## रसः

**तर्कसंग्रहः**

**रसनग्राह्यो गुणो रसः। स च मधुर, अम्ल, लवण, कटु, कषाय, तिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। पृथिव्यां षड्विधः। जले मधुर एव।**

**तक्रे अनुभूतम् अम्लत्वं जलस्य वा?**

**टिप्पणी**

रसनग्राह्यत्वे सति गुणत्वं रसस्य लक्षणम्। रूपादौ अतिव्याप्तिवारणाय रसनेति। रसत्वे रसाभावे च अतिव्याप्तिवारणाय गुणपदम्। पृथिवीजलयोरेव रसः। तत्र-पृथिवीजलयोर्मध्ये सर्वेऽपि रसाः पृथिव्याम् एव। जले तु मधुरः एव रसः इति। मधुर एव इत्यत्र एवपदेन जले मधुरभिन्नः न कोऽपि रसः इति बोधयति। जले अम्लादिरसानामुपलब्धिः तद्रसयुक्तपार्थिवभागस्याभिसम्बन्धात् नान्यथेति।

## गन्धः

**तर्कसंग्रहः**

**घ्राणग्राह्यो गुणो गन्धः। स द्विविधः सुरभिः असुरभिः च इति। पृथिवीमात्रवृत्तिः।**

**टिप्पणी**

घ्राणग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम्। रूपादौ अतिव्याप्तिवारणाय घ्राणपदम्। गन्धत्वे, गन्धाभावे च अतिव्याप्तिवारणाय गुणपदम्। पृथिवीमात्र इत्यत्र मात्रपदं, पृथिवीसत्त्वे एव गन्धसत्त्वं, पृथिव्यभावे गन्धाभावः इत्यर्थं बोधयितुं प्रयुक्तम्। पवनजलादिषु यदि गन्धोपलब्धिः तर्हि तत्र पृथिवीसम्बन्धः अस्ति इति अवश्यं ज्ञेयम्।

## स्पर्शः

**तर्कसंग्रहः**

**त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।**

### टिप्पणी

त्वगिन्द्रियभिन्नैः चक्षुरादीन्द्रियैः अग्राह्यत्वम् इति बोधयितुं मात्रपदम्। तथा च त्वगिन्द्रियग्राह्यत्वे सति त्वगिन्द्रियभिन्नेन्द्रियैः अग्राह्यत्वे सति गुणत्वमिति लक्षणं फलितम्। स्पर्शत्वादिषु अतिव्याप्तिवारणाय गुणपदम्। रूपादिषु अतिव्याप्तिवारणाय त्वक् इति। सङ्ख्यादिषु अतिव्याप्तिवारणाय मात्रपदम्। त्रिविधभेदः उच्यते शीतेति।

## पाकः

### तर्कसंग्रहः

**रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।**

**पाकप्रक्रियायां केषां गुणानां परिणामः ?**

### टिप्पणी

रूपादिचतुष्टयं निरूप्य पाकः उच्यते। पाको नाम विजातीयतेजसंयोगः। विजातीयः नाम रूपादिपरावृत्तिजनकः। पृथिव्यां पाके कृते पूर्वरूपरसगन्धस्पर्शानां नाशः अन्येषां रूपादीनाम् उत्पत्तिः च भवति। यथा आम्रः कदली इत्यादीनां फलरूपेण परिणामे पाकः एव कारणम्।

तत्र पूर्वरूपरसगन्धस्पर्शानां नाशः रूपान्तरादीनाम् उत्पत्तिः च दृश्यते। अतः रूपादिचतुष्टयं पृथिव्यां पाकेन अनित्यं भवति। उत्पत्तिनाशवत् भवति। पृथिवीपरमाणुष्वपि पाकसंभवात् तत्रापि रूपादिचतुष्टयम् अनित्यमेव। अन्यत्र जलादौ तु पाकः नास्ति। अतः पृथिवीगतं रूपादिचतुष्टयम् अनित्यमेव। जलादिषु रूपादि द्विविधं - नित्यम् अनित्यं च। नित्ये परमाणौ वर्तमानं नित्यम्। अनित्ये कार्ये वर्तमानम् अनित्यम्।

## संख्या

### तर्कसंग्रहः

**एकत्वादिव्यवहारहेतुः संख्या। नवद्रव्यवृत्तिः। एकत्वादि परार्धपर्यन्ता। एकत्वं नित्यगतं नित्यम्। अनित्यगतम् अनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।**

**टिप्पणी**

एकः द्वौ इत्यादिः यः व्यवहारः तस्य हेतुः संख्या इत्यर्थः। एकत्वादि इत्यत्र आदिपदेन द्वित्वत्रित्वादीनां ग्रहः। घटादौ अतिव्याप्तिवारणाय एकत्वादि इति। सर्वेष्वपि द्रव्येषु संख्या वर्तते। एकत्वादिपरार्धपर्यन्ता च। तथा च उक्तं-

एकं दशं शतं चैव सहस्रमयुतं तथा।

लक्षञ्च प्रयुतं चैव कोटिरर्बुदमेव च।।

वृन्दं खर्वो निखर्वश्च शंखः पद्मश्च सागरः।

अन्त्यं मध्यं परार्धञ्च दशवृद्ध्या यथाक्रमम्।।

आकाशादिषु परमाणुषु नित्यद्रव्येषु वर्तमानमेकत्वं नित्यम्। घटादिषु अनित्यपदार्थेषु निष्ठम् एकत्वम् अनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यम्, तेषामुत्पत्तिमत्त्वात् च। तत्र अयम् एकः अयम् एकः इति गणने अनेकैकत्वबुद्धिः या सापेक्षाबुद्धिः। तया द्वित्वादिः जन्यते।

## परिमाणम्

**तर्कसंग्रहः**

**मानव्यवहारासाधारणं कारणं परिमाणम्। नव द्रव्यवृत्ति। तच्चतुर्विधम्। अणु, महत्, दीर्घं, ह्रस्वं चेति।**

**टिप्पणी**

मानं परिमितिः। तस्य इदं महत्, इदम् अणु इत्याद्यात्मकः यः व्यवहारः, तस्य करणं परिमाणमित्यर्थः। साधारणकारणेषु कालादिषु अतिव्याप्तिवारणाय असाधारणेति। घटादिषु अतिव्याप्तिवारणाय मानेति। अणुपरिमाणं, महत्परिमाणं, दीर्घपरिमाणं, ह्रस्वपरिमाणञ्चेति परिमाणं चतुर्विधम्। परमाणौ द्व्यणुके च अणुपरिमाणम्। महत्परिमाणं घटादौ। परममहत्परिमाणं आकाशादौ। एवं ह्रस्वपरिमाणम् अणुद्रव्ये। दीर्घपरिमाणं च दण्डादौ। नित्यद्रव्यगतं परिमाणं नित्यम्। अनित्यद्रव्यगतम् अनित्यम्।

# पृथक्त्वम्

**तर्कसंग्रहः**

**पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।**

**टिप्पणी**

अयमस्मात्पृथक् इति यः व्यवहारः तस्य कारणं पृथक्त्वमित्यर्थः।

# संयोगः

**तर्कसंग्रहः**

**संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः।**

**टिप्पणी**

इमौ संयुक्तौ इति यः व्यवहारः तस्य हेतुः संयोगः। घटादौ अतिव्याप्तिवारणाय संयुक्तेति।

# विभागः

**तर्कसंग्रहः**

**संयोगनाशको गुणः विभागः। सर्वद्रव्यवृत्तिः।**

**टिप्पणी**

अयमस्मात् विभक्तः इति व्यवहारस्य असाधारणं कारणं विभागः। संयोगनाशजनकत्वे सति गुणत्वं विभागस्य लक्षणम्। गुणत्वमात्रोक्तौ रूपादौ अतिव्याप्तिः। संयोगनाशकत्वमात्रोक्तौ क्रियायाम् अतिव्याप्तिः।

# परत्वापरत्वे

**तर्कसंग्रहः**

**परापरव्यवहारासाधारणकारणे परत्वापरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी । ते च द्विविधे दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।**

### टिप्पणी

परव्यवहारासाधारणं कारणं परत्वम्। अपरव्यवहारासाधारणं कारणमपरत्वमिति च लक्षणद्वयम्। पृथिव्यां, जले, तेजसि वायौ मनसि च परत्वमपरत्वञ्च वर्तेते। परत्वं द्विविधं दिक्कृतपरत्वं, कालकृतपरत्वं च। दूरस्थे परत्वं दिक्कृतम्। ज्येष्ठे परत्वं कालकृतम्।

अपरत्वमपि द्विविधम्। समीपस्थे अपरत्वं दिक्कृतम्। कनिष्ठे अपरत्वं कालकृतञ्च। दिक्कृतपरत्वापरत्वयोः नियामकं मूर्तद्रव्यान्तरितत्वम्। यदपेक्षया मूर्तद्रव्यान्तरितत्वं यस्य अधिकं तत् परम्। यदपेक्षया मूर्तद्रव्यान्तरितत्वमल्पं तदपरम्। एवं यदपेक्षया यस्य सूर्यपरिस्पन्दः अधिकः सः ज्येष्ठः तस्य कालिकपरत्वम्। यदपेक्षया यस्य सूर्यपरिस्पन्दः न्यूनः सः कनिष्ठः- तस्मिन् कालिकापरत्वम्।

| | दिक्कृतम् | कालकृतम् |
|---|---|---|
| परत्वम् | दूरस्थे | ज्येष्ठे |
| अपरत्वम् | समीपस्थे | कनिष्ठे |

## गुरुत्वम्

### तर्कसंग्रहः

**आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति।**

### टिप्पणी

शाखातः विभागात् फलस्य भूमौ पतनं सम्भवति। तत्र पतनक्रियाः अनेकाः। तत्र आद्यपतनस्य असमवायिकारणं गुरुत्वम्। तदनन्तरं तस्य भूमिसंयोगपर्यन्तं पतनं सम्भवति।

तत्र द्वितीयादिपतनं प्रति असाधारणं कारणं वेगः। तथा च द्वितीयादिपतनकरणे वेगे अतिव्याप्तिवारणाय आद्येति पदम्। आद्यपतनकारणम् इत्युक्ते समवायिकारणे फलादौ अतिव्याप्तिः। अतः असमवायिकारणम् इति। पृथिवीजलमात्रवृत्ति गुरुत्वम्। अग्न्यादि तेजः ऊर्ध्वं ज्वलति। वायुः तिर्यक् वाति। तत्र गुरुत्वाभावात् पतनं नास्ति।

# द्रवत्वम्

**तर्कसंग्रहः**

**आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद् द्विविधं सांसिद्धिकं नैमित्तिकञ्च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादौ अग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ।**

**टिप्पणी**

स्यन्दनं स्रवणं प्रवाहो वा। आद्यस्यन्दनस्य असमवायिकारणं द्रवत्वम्। द्वितीयादिस्यन्दनेषु वेगः असमवायिकारणमिति, तत्र अतिव्याप्तिवारणाय आद्येति। समवायिकारणे जलादौ अतिव्याप्तिवारणाय असमवायिकारणमिति। रसादौ अतिव्याप्तिवारणाय स्यन्दनेति। सांसिद्धिकं स्वाभाविकम्। नैमित्तिकं- निमित्तजन्यं। अत्र निमित्तञ्च पाकः अग्निसंयोगः। घृतादिषु पार्थिवपदार्थेषु सुवर्णरजतादिषु तैजसपदार्थेषु च अग्निसंयोगजन्यं द्रवत्वं नैमित्तिकद्रवत्वम्।

# स्नेहः

**तर्कसंग्रहः**

**चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।**

**टिप्पणी**

पिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम्। पिण्डीभावो नाम चूर्णादेः धारणाकर्षणहेतुभूतः विलक्षणः संयोगः। चूर्णम् आदिः यस्य सः चूर्णादिः मृत्तिकादिः । तस्य पिण्डीभावे कारणं निमित्तकारणम्। तथा च पिण्डीभावनिमित्तकारणत्वे सति गुणत्वं स्नेहस्य लक्षणम्। चूर्णस्य विलक्षणसंयोगरूपस्य पिण्डीभावस्य असाधारणं कारणं स्नेहः एव। न तु जलादिगतद्रवत्वं। द्रवत्वस्य पिण्डीभावहेतुत्वे द्रुतसुवर्णादिसंयोगेन चूर्णादेः पिण्डीभावापत्तिः। अतः स्नेह एव असाधारणं कारणं पिण्डीभावस्य। गुण इति विशेष्यानुपादाने कालादौ अतिव्याप्तिः।

## शब्दः

### तर्कसंग्रहः

**श्रोत्रग्राह्यः गुणः शब्दः। आकाशमात्रवृत्तिः। सः द्विविधः ध्वन्यात्मकः वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।**

### टिप्पणी

श्रोत्रग्राह्यत्वे सति गुणत्वं शब्दस्य लक्षणम्। शब्दः आकाशवृत्तिः गुणः, नान्यत्र शब्दः वर्तते इति बोधयितुं मात्रपदम्। शब्दत्वे अतिव्याप्तिवारणाय गुणः इति। रूपादौ अतिव्याप्तिवारणाय श्रोत्र इति। भेरीदण्डसंयोगजन्यः शब्दः ध्वन्यात्मकः। भाषासु अक्षरादीनामुच्चारणरूपः वर्णात्मकः शब्दः। प्रकारान्तरेण शब्दः त्रिविधः। १. संयोगजः, २. विभागजः, ३. शब्दजः इति।


## बुद्धिः

### तर्कसंग्रहः

**सर्वव्यवहारहेतुः गुणो बुद्धिः ज्ञानम्। सा द्विविधा स्मृतिः अनुभवः च।**

### टिप्पणी

सर्वे ये व्यवहाराः वाचिकाः कायिकाः च तेषां हेतुः बुद्धिः। बुद्धिः ज्ञानमिति पर्यायौ। ज्ञानं विना शब्दप्रयोगासम्भवात् शब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य। हेतुः च असाधारणं कारणम्। सर्वव्यवहारहेतुत्वे सति गुणत्वं बुद्धेः लक्षणम्। घटादौ अतिव्याप्तिवारणाय सर्वव्यवहारेति। स्मृतिः अनुभवः च इति बुद्धिः द्विविधा।




## स्मृतिः

**तर्कसंग्रहः**

**संस्कारमात्रजन्यं ज्ञानं स्मृतिः।**

**टिप्पणी**

अत्र संस्कारो भावना। प्रत्यक्षजन्यम् इति अर्थः मात्रपदेन बुध्यते। तथा च संस्कारमात्रजन्यं ज्ञानं प्रत्यभिज्ञा न भवति। इति स्मृतिलक्षणस्य तत्र न अतिव्याप्तिः।

## अनुभवः

**तर्कसंग्रहः**

**तद्भिन्नं ज्ञानमनुभवः। सः द्विविधः यथार्थोऽयथार्थश्च।**

**टिप्पणी**

तद्भिन्नं नाम स्मृतिभिन्नम्। स्मृतिभिन्नत्वे सति ज्ञानत्वम् इति लक्षणम्। तत्र विशेषणानुपादाने स्मृतौ अतिव्याप्तिः। विशेष्यानुपादाने घटादौ अतिव्याप्तिः। यथार्थः अयथार्थः इति अनुभवस्य भेदः उक्तः।

# यथार्थानुभवः

**तर्कसंग्रहः**

**तद्वति तत्प्रकारकः अनुभवः यथार्थः। यथा रजते इदं रजतम् इति ज्ञानम्। सा एव प्रमा इत्युच्यते।**

**टिप्पणी**

तत्र तच्छब्देन प्रकारीभूतः धर्मः गृह्यते। रजते इदं रजतम् इत्यत्र प्रकारीभूतः धर्मः रजतत्वम्। इदं शब्दस्य पुरोवर्तिपदार्थः अर्थः। तथा च रजते पुरोवर्तिनि पदार्थे रजतत्वप्रकारकं रजतविशेष्यकं च ज्ञानम् उत्पद्यते। रजतत्ववति रजते, रजतत्वप्रकारकं यत् ज्ञानमुत्पद्यते तद् यथार्थानुभवः इत्यर्थः। स्मृतौ अतिव्याप्तिवारणाय अनुभवः इति। अयथार्थानुभवे अतिव्याप्तिवारणाय तद्वति इति। यथार्थानुभवः एव प्रमा इत्युच्यते।

# अयथार्थानुभवः

**तर्कसंग्रहः**

**तदभाववति तत्प्रकारकः अनुभवोऽयथार्थः। यथा शुक्तौ इदं रजतम् इति ज्ञानम्। सैव अप्रमा इत्युच्यते।**

**टिप्पणी**

अत्र 'तत्' शब्दस्य प्रकारः अर्थः। शुक्तौ इदं रजतम् इत्यत्र, रजतत्वाभाववति शुक्तिद्रव्ये रजतत्वं प्रकारतया आभासते इति अयमनुभवः अयथार्थः। स्मृतौ अतिव्याप्तिवारणाय अनुभवः इति। यथार्थानुभवे अतिव्याप्तिवारणाय तदभाववति इति । अयथार्थानुभवः एव अप्रमा इत्युच्यते।

# प्रमाणभेदाः

**तर्कसंग्रहः**

**यथार्थानुभश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम् प्रत्यक्षानुमानोपमानशब्दभेदात्।**

**टिप्पणी**

प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दः इति भेदात् यथार्थानुभवः चतुर्विधः इति अर्थः।

प्रत्यक्षादीनां चतुर्णां ज्ञानानां करणमपि चतुर्विधम्। तत् प्रमाणम् इति उच्यते। प्रमाकरणत्वम् प्रमाणानां सामान्यलक्षणम्। तत्र प्रत्यक्षस्य करणं प्रत्यक्षम्। अनुमितेः करणम् अनुमानम्। उपमितेः करणम् उपमानम्। शाब्दकरणं शब्दः इति क्रमः।

गुणलक्षणप्रकरणम् समाप्तम्

# कारणनिरूपणप्रकरणम्।

## करणम्

**तर्कसंग्रहः**

**असाधारणं कारणं करणम्।**

**टिप्पणी**

साधारणकारणं नाम सकलकार्यं प्रति यत् कारणं तत्। यथा कालः ईश्वरः इत्यादिः।

असाधारणं कारणं नाम तत्तत्कार्यनियतम् कारणम्। यथा पटं प्रति तन्तवः असाधारणकारणम्। तदेव करणम्।

## कारणम्

**तर्कसंग्रहः**

**कार्यनियतपूर्ववृत्ति कारणम्।**

**टिप्पणी**

कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वं कारणत्वम् इति अर्थः। नियतत्वं नाम फलितम्।

## कार्यम्

**तर्कसंग्रहः**

**कार्यं प्रागभावप्रतियोगि।**

**टिप्पणी**

प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम्। कार्यस्य घटस्य उत्पत्तेः पूर्वं कुलालमृत्सलिलदण्डदर्शने सति घटो नास्ति इति या प्रतीतिः जायते तत्प्रतीतिविषयीभूतः अभावः प्रागभावः। तस्य प्रतियोगी घटः एव कार्यम्।

# कारणभेदाः

**तर्कसंग्रहः**

**कारणं त्रिविधम्- समवाय्यसमवायिनिमित्तभेदात्।**

**टिप्पणी**

१. समवायिकारणम्।

२. असमवायिकारणम्।

३. निमित्तकारणम्

एवं प्रकारेण कारणं त्रिविधम् इत्यर्थः।

# समवायिकारणम्

**तर्कसंग्रहः**

**यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य। पटश्च स्वगतरूपादेः।**

**टिप्पणी**

यत्र समवायसम्बन्धेन वर्तमानं सत् यत् कार्यम् उत्पद्यते तत् समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्। तथाहि तन्तुषु समवायेन सम्बद्धं तत् पटात्मकं कार्यम् उत्पद्यते इत्यतः तन्तवः समवायिकारणम्। तत्र यच्छब्देन कारणं ग्राह्यम्, यत्समवेतम् -येषु तन्तुषु समवायेन सम्बद्धं सत् , कार्यमुत्पद्यते पटात्मकं कार्यमुत्पद्यते तत, तन्तवः, पटं प्रति समवायिकारणम् इत्यर्थः। एवं पटरूपं प्रति पटः समवायिकारणम्।

# असमवायिकारणम्

**तर्कसंग्रहः**

**कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम्। यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य।**

**टिप्पणी**

असमवायिकारणं द्विविधम्। तत्र कार्येण सह एकस्मिन्नर्थे समवेतं कारणम् असमवायिकारणम् इति प्रथमम्। कारणेन- समवायिकारणेन सह एकस्मिन्नर्थे समवेतं कारणम् असमवायिकारणम् इति अपरम्। प्रथमं यथा पदं प्रति तन्तुसंयोगः असमवायिकारणम्। असमवायिकारणम्। कारणेन सह पटरूपस्य समवायिकारणेन पटेन सह एकस्मिन्नर्थे तन्तौ समवेतत्वे सति कारणत्वं तन्तुरूपस्य इति तत् पटरूपं प्रति असमवायिकारणम् इत्यर्थः। तन्तौ तन्तुरूपम् अप्यस्ति। पटः अप्यस्ति। अतः पटेन सह तन्तौ समवेतं तन्तुरूपं असमवायिकारणम्।

## निमित्तकारणम्

**तर्कसंग्रहः**

**तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।**

**टिप्पणी**

समवायिकारणभिन्नं असमवायिकारणभिन्नं च कारणं निमित्तकारणम् इत्यर्थः। पटोत्पत्तौ उपर्युक्तकारणभिन्नानां सर्वेषामपि कारणानां निमित्तकारणत्वमिति।

| कार्यम् | समवायिकारण् | असमवायिकारणम् | निमित्तकारणम् |
|---|---|---|---|
| १. पटः | तन्तवः | तन्तुसंयोगः | तन्तुवायः |
| २. घटः | कपालौ | कपालसंयोगः | कुलालः |
| ३. पुस्तकम् | पत्राणि | पत्रसंयोगः | प्रसाधकः |
| ४. पटरूपम् | पटः | तन्तुरूपम् | ईश्वरकालः |
| ५. घटगन्धः | घटः | कपालगन्धः | ईश्वरकालः |

# करणस्य निष्कृष्टलक्षणम्

**तर्कसंग्रहः**

**तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।**

**टिप्पणी**

अत्र व्यापारवत्वे सति यदसाधारणं कारणं तत्करणमिति बोद्ध्यम्। व्यापारपदानुपादाने चक्रभ्रमणादौ अतिव्याप्तिः। तेषां भ्रमणस्य कपालजन्यत्वे सति कपालजन्यघटजनकत्वात् इति। एवम् असाधारणपदस्य अभावे ईश्वरादृष्टादौ अतिव्याप्तिः।

कारणनिरूपणप्रकरणम् समाप्तम्।



## पठनप्रवर्तनानि

- **गुणानां द्रव्यवृत्तित्वमधिकृत्य सङ्गोष्ठीं चालयत टिप्पणिं च लिखत।**

  **श्रद्धेयाशाः -**

  पाठभागवाचनम्

  संघे चर्चा

  लक्षणविशकलनम्

  व्यक्तिशः टिप्पणिलेखनम्

- **गुणानां विभागसूचिकां पट्टिकां रचयत। पट्टिकासाहाय्येन द्वयोर्गुणयोः विभागमधिकृत्य लघुटिप्पणिं रचयत।**

  **श्रद्धेयाशाः -**

  पाठभागवाचनम्

  संघे चर्चा

  लक्षणविशकलनम्

  व्यक्तिशः टिप्पणिलेखनम्

- **नैय्यायिकाभिमतान् बुद्धेः विभागानधिकृत्य संवादं चालयत। आवेदनपत्रिकां च लिखत।**

# प्रत्यक्षप्रकरणम्।

## प्रत्यक्षप्रमाणम्

**तर्कसंग्रहः**

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्।**

**टिप्पणी**

प्रत्यक्षप्रमाकरणत्वं प्रत्यक्षप्रमाणस्य लक्षणम्। सर्वेष्वपि ज्ञानेषु, आत्ममनः संयोगः कारणम्। प्रत्यक्षे तु आत्ममनः संयोगः, मन इन्द्रियसंयोगः, इन्द्रियार्थसंयोगः इति त्रिविधं कारणं भवति। तत्र ज्ञानम् प्रति व्यापारवदसाधारणं कारणम् अथवा करणमिन्द्रियं भवति। तस्मात् इन्द्रियमेव प्रत्यक्षप्रमाणम् इति बोध्यम्। अनुमानादौ अतिव्याप्तिवारणाय प्रत्यक्षपदम्।

## प्रत्यक्षप्रमा

**तर्कसंग्रहः**

**इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्)।**

**टिप्पणी**

प्रत्यक्षप्रमालक्षणमुच्यते । इन्द्रियाणि चक्षुरादीनि अर्थाः रूपादयः, सन्निकर्षः सम्बन्धः, इन्द्रियस्य अर्थेन सह सम्बन्धे सति, यद् ज्ञानम् उत्पद्यते तत्प्रत्यक्षमित्यर्थः। तथा च इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणं फलितम्। विशेषण पदस्याभावे अनुमित्यादिषु अतिव्याप्तिः। ज्ञानपदस्याभावे सन्निकर्षध्वंसे अतिव्याप्तिः।

अनुमितौ व्याप्तिज्ञानं, उपमितौ सादृश्यज्ञानं शाब्दे पदज्ञानञ्च करणानि इति, तानि अनुमित्यादिज्ञानानि ज्ञानकरणकानि। प्रत्यक्षे तु इन्द्रियार्थसन्निकर्षः एव करणम्। तस्य ज्ञानं न करणम् इति प्रत्यक्षस्य लक्षणान्तरमुच्यते ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् इति। लक्षणमिदं ईश्वरप्रत्यक्षसाधारणम्।

## प्रत्यक्षभेदौ

**तर्कसंग्रहः**

**तत् द्विविधं- निर्विकल्पकं, सविकल्पकं चेति।**

**टिप्पणी**

प्रत्यक्षज्ञानं द्विविधम् उच्यते।

## निर्विकल्पकम्

**तर्कसंग्रहः**

**तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्।**

**टिप्पणी**

निर्विकल्पकलक्षणमुच्यते। तत्र सविकल्पकनिर्विकल्पकयोः मध्ये विकल्परहितं निर्विकल्पकम्। विकल्पश्च प्रकारः। तथा च प्रकारशून्यं ज्ञानं निर्विकल्पकमित्यर्थः। यथा घटः इति ज्ञाने घटत्वं प्रकारः, घटः विशेष्यः। एतज्ज्ञानात् पूर्वं प्रकाररहितम् एकं ज्ञानं जातम्। तत् निर्विकल्पकम्। तस्य आकारः न वक्तुं शक्यते।

## सविकल्पकम्

**तर्कसंग्रहः**

**सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयं ब्राह्मणोऽयम् श्यामोऽयमिति।**

**टिप्पणी**

अयं घटः इति ज्ञाने घटत्वं प्रकारः। प्रकारसहितं सप्रकारकं सविकल्पकमित्युच्यते। विकल्पाः संज्ञाजातिगुणक्रियादयः। यथा डित्थनामकोयं ब्राह्मणत्ववानयं श्यामरूपवानयम् इति। इदं शब्दार्थे डित्थत्वादयो विकल्पाः तादृशविकल्पसहितं ज्ञानं सविकल्पकमुच्यते इत्यर्थः।

## इन्द्रियार्थसन्निकर्षः

**तर्कसंग्रहः**

**प्रत्यक्षज्ञानहेतुः इन्द्रियार्थसन्निकर्षः षड्विधः- संयोगः, संयुक्तसमवायः संयुक्तसमवेतसमवायः , समवायः, समवेतसमवायः, विशेषणविशेष्यभावः च इति।**

**१. चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।**

**२. घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः। चक्षुः संयुक्ते घटे रुपस्य समवायात्।**

**३. रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। चक्षुः संयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात्।**

**४. श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात्, शब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात्।**

**५. शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।**

**६. अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।**

## इन्द्रियार्थसन्निकर्ष

| | | |
|---|---|---|
| संयोगः | - | (द्रव्यप्रत्यक्षम्) घटप्रत्यक्षम् |
| संयुक्तसमवायः | - | (गुणप्रत्यक्षम्) घटगतरूपप्रत्यक्षम् |
| संयुक्तसमवेतसमवायः | - | (गुणत्वजाति प्रत्यक्षम्) घटगतरूपत्वप्रत्यक्षम् (घटं - रूपम् - रूपत्वम्) |
| समवायः | - | शब्दप्रत्यक्षम् |
| समवेतसमवायः | - | शब्दत्वप्रत्यक्षम् |
| विशेषणविशेष्यभावः | - | अभावप्रत्यक्षम् (भूतले घटाभावः) |

प्रत्यक्षज्ञानस्य करणम् इन्द्रियं प्रत्यक्षप्रमाणम् इत्युच्यते। इन्द्रियैः प्रत्यक्षजनने इन्द्रियार्थसन्निकर्षः आवश्यकः। इन्द्रियाणाम् अर्थेन- विषयेन सह सन्निकर्षः- संबन्धः इन्द्रियार्थसन्निकर्षः। सः षड्विधः। सोदाहरणं निरूप्यते।

१. **संयोगः सन्निकर्षः** - चक्षुरिन्द्रियेण घटप्रत्यक्षजनने संयोगः सन्निकर्षः। चक्षुरिन्द्रियस्य रश्मिद्वारा घटे संयोगः संबन्धः भवति इति।

२. **संयुक्तसमवायः सन्निकर्षः** - चक्षुरिन्द्रियेण घटे रूपस्य प्रत्यक्षे अयम्। चक्षुरिन्द्रियस्य घटद्वारा रूपे सन्निकर्षः। चक्षुषः घटे संयोगः सन्निकर्षः। घटस्य रूपे समवायः संबन्धः। ते चक्षुषः घटरूपे संयुक्तसमवायः सन्निकर्षः।

३. **संयुक्तसमवेतसमवायः** - चक्षुषा रूपत्वसामान्यस्य प्रत्यक्षे अयम्।

चक्षुरिन्द्रियस्य घटे संयोगः। तत्र घटे रूपं समवायसंबन्धेन वर्तते। रूपे रूपत्वं समवायेन वर्तते। एवं त्रयाणां क्रमेण मेलने चक्षुषः संयुक्त- समवेत- समवायः- रूपत्वेन सह सन्निकर्षः।

४. **समवायः**- श्रोत्रेण शब्दप्रत्यक्षे अयम्। श्रोत्रं नाम कर्णविवरवर्ति आकाशमेव। आकाशे शब्दः गुणः। गुणः द्रव्ये समवायेन वर्तते। अतः श्रोत्रस्य शब्दे सन्निकर्षः समवायः।

५. **समवेतसमवायः** -श्रोत्रेण शब्दत्वप्रत्यक्षे अयम्। श्रोत्रस्य शब्दे समवायः। शब्दे शब्दत्वं समवायेन वर्तते। अतः श्रोत्रस्य शब्दत्वे समवेतसमवायः।

६. **विशेषणविशेष्यभावः** - चक्षुषा अभावप्रत्यक्षे अयं सन्निकर्षः। यथा भूतलं घटाभाववत् इति ज्ञानम्। तत्र चक्षुषा संयुक्तं भूतलम्। तत्र घटाभावः विशेषणम् इति संयुक्तविशेषणता सन्निकर्षः।

इत्थम् उदाहरणं किञ्चित् प्रदर्शितम्। सर्वेषाम् इन्द्रियाणाम् एवं रीत्या अर्थेषु सन्निकर्षः भवति।

| सन्निकर्षः | | | | | |
|---|---|---|---|---|---|
| संयोगः | संयुक्त-समवायः | संयुक्तसमवेत-समवायः | समवायः | समवेत-समवायः | विशेषणविशेष्य-भावः |
| दूरदर्शने चित्रं पश्यति | अरुणवर्णं चित्रं पश्यति | अरुण वर्णत्वं पश्यति। | गानं श्रुणोति। | शब्दत्वं जानाति | वैद्युदापगमे चित्रस्य अभावः। |

## प्रत्यक्षप्रमाणम्

**तर्कसंग्रहः**

**एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणम् इन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।**

**टिप्पणी**

इन्द्रियं करणं, इन्द्रियार्थसन्निकर्षः व्यापारः, प्रत्यक्षज्ञानं फलं चेति असाधारणकारणत्वम् इन्द्रियस्यैवेति इन्द्रियमेव प्रत्यक्षप्रमाणमिति।

इति प्रत्यक्षखण्डः।



## पठनप्रवर्त्तनम्

- **'वृक्षस्थं हरितं शुकं पश्यति । तन्नादं श्रुणोति च ।वृक्षात् डयते च' सन्निकर्षान् विवेचयत।**

  १ शुकं पश्यति।

  २ हरितं शुकं पश्यति।

  ३ शुकनादं श्रुणोति

  ४ हरितत्वं जानाति

  ५ शुकनादत्वं श्रुणोति ।

  ६ वृक्षे शुकः नास्ति।

# अनुमानप्रकरणम्

## अनुमानम्

**तर्कसंग्रहः**

**अनुमितिकरणम् अनुमानम्।**

**टिप्पणी**

प्रत्यक्षप्रमाणं निरूप्य ततः अनुमाननिरूपणं क्रियते। अनुमीयते अनेन इति अनुमानम्। अनुमितिकरणम् इत्यर्थः। अनुमितिकरणत्वम् अनुमानस्य लक्षणम्। तत्र अनुमितिः इति प्रमा। करणम् असाधारणं कारणम्। एवं च अनुमितौ यत् असाधारणं तत् अनुमानम् इति।

## अनुमितिः

**तर्कसंग्रहः**

**परामर्शजन्यं ज्ञानम् अनुमितिः।**

**टिप्पणी**

परामर्शात् यत् ज्ञानं जायते, सा अनुमितिः। परामर्शजन्यत्वे सति ज्ञानत्वम् अनुमितेः लक्षणम्। ज्ञानत्वमात्रोक्तौ प्रत्यक्षे अतिव्याप्तिः। अतः परामर्शजन्यत्वमिति। परामर्शजन्यत्वमात्रोक्तौ परामर्शध्वंसे अतिव्याप्तिः। अतः ज्ञानपदम्।

## परामर्शः

**तर्कसंग्रहः**

**व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः।**

**टिप्पणी**

व्याप्तिविशिष्टं यत् पक्षधर्मताज्ञानं सः परामर्शः। व्याप्तिप्रकारकं पक्षधर्मताज्ञानम्

इत्यर्थः। यथा 'वह्निव्याप्यधूमवान् अयं पर्वतः' इति परामर्शज्ञानम्। अत्र वह्निव्याप्यो धूमः इति व्याप्त्यंशो गृह्यते। धूमवान् पर्वतः इति पक्षधर्मता गृह्यते। अतः इदं ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं भवति। एतस्मात् ज्ञानात् पर्वतो वह्निमान् इति ज्ञानम् उत्पद्यते। तदेव अनुमितिः इत्युच्यते।

तत्र इयम् अनुमानप्रक्रिया- पर्वते धूमं दृष्ट्वा वह्निः अस्तीति अनुमानं करोति। तत्र पूर्वमेव तावत् महानसादौ धूमं वह्निं च सहचरितं पश्यति। ततः यत्र यत्र धूमः तत्र वह्निः इति अवगच्छति। इदं व्याप्तिज्ञानम् इत्युच्यते। ततः कदाचित् पर्वते उपरि धूममात्रं पश्यति।

पर्वतो धूमवान् इति ज्ञानं भवति। तत् लिङ्गदर्शनम् इत्युच्यते। ततः पूर्वगृहीतं व्याप्तिं स्मरति- यत्र यत्र धूमः तत्र तत्र वह्निः इति। ततः ज्ञानद्वयमेलनेन वह्निव्याप्यधूमवान् पर्वतः इति एकं ज्ञानं जायते। अयमेव परामर्शः इत्युच्यते। ततः पर्वतो वह्निमान् इति ज्ञानं जायते। इदमेव अनुमितिः।

**अनुमानप्रक्रिया**

| क्रमिकज्ञानानि | रीतिः | ज्ञान- आकारः |
|---|---|---|
| १. व्याप्तिज्ञानम् | महानसादौ धूमवह्न्योः सहचारज्ञानम्- (अलौकिक प्रत्यक्षज्ञानम्) | यत्र यत्र धूमः तत्र तत्र (वह्निव्याप्यो धूमः इति) |
| २. लिङ्गदर्शनम् | पर्वते धूमस्य दर्शनम्- (प्रत्यक्षज्ञानम्) | पर्वतो धूमवान्। |
| ३. व्याप्तिस्मरणम् | पूर्वं गृहीतायाः व्याप्तेः स्मरणम् (स्मृतिः) | वह्निव्याप्यो धूमः। |
| ४. परामर्शः | व्याप्तिविशिष्टं पक्षधर्मता- ज्ञानम् | वह्निव्याप्यधूमवान् पर्वतः। |
| ५. अनुमितिः | पर्वते वह्नेः अवगमः अनुमितिः। | पर्वतो वह्निमान्। |

## व्याप्तिः।

**तर्कसंग्रहः**

**यत्र यत्र धूमः तत्र तत्र अग्निः इति साहचर्यनियमो व्याप्तिः।**

**टिप्पणी**

यत्र यत्र धूमः तत्र तत्र अग्निः इति व्याप्तिज्ञानस्य आकारः। साहचर्यनियमः इति लक्षणम् उच्यते। नियतसाहचर्यम् इत्यर्थः। साहचर्यमित्यस्य समानाधिकरण्यमित्यर्थः। तच्च वह्निधूमयोः समानेऽधिकरणे वृत्तित्वम्। सहचरतः इति सहचरौ तयोर्भावः साहचर्यं तस्य नियमो व्याप्तिरिति। एवञ्च हेतुसाध्ययोः नियमेन समाने एकस्मिन्नधिकरणे वृत्तित्वं व्याप्तिरिति।

## पक्षधर्मता।

**तर्कसंग्रहः**

**व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता।**

**टिप्पणी**

व्याप्यः नाम व्याप्त्याश्रयः। यथा धूमः व्याप्यः। व्यापकः नाम व्याप्तिनिरूपकः यथा वह्निः। पक्षः पर्वतादिः। व्याप्यस्य- धूमस्य पर्वतादिवृत्तित्वं पक्षधर्मता। यथा पर्वतो धूमवान् इति पक्षधर्मताज्ञानम्।

## अनुमानभेदः।

**तर्कसंग्रहः**

**अनुमानं द्विविधं- स्वार्थं परार्थं चेति।**

**टिप्पणी**

स्वस्य अर्थः- प्रयोजनं यस्मात् तत् स्वार्थानुमानम्। परस्य अर्थः प्रयोजनं यस्मात्, तत् परार्थानुमानम्। परार्थानुमाने परं प्रति बोधयितुं पञ्च अवयववाक्यानि प्रयुज्यन्ते। स्वार्थानुमाने वाक्यानां न उपयोगः।

# स्वार्थानुमानम्।

**तर्कसंग्रहः**

**स्वार्थम्- स्वानुमितिहेतुः। तथा हि- स्वयमेव भूयोदर्शनेन यत्र यत्र धूमः तत्र तत्र अग्निः इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति- यत्र यत्र धूमः तत्र तत्राग्निः इति। तदनन्तरं वह्निव्याप्यधूमवान् अयं पर्वतः इति ज्ञानमुत्पद्यते, अयमेव लिङ्गपरामर्श इति उच्यते। तस्मात् पर्वतो वह्निमान् इति अनुमितिरुत्पद्यते। तदेतत् स्वार्थानुमानम्।**

**टिप्पणी**

कश्चन पुरुषः बहुवारं महानसादौ धूमस्य अग्नेः च दर्शनेन यत्र धूमः तत्र अग्निः इति व्याप्तिं गृह्णाति। सः कदाचित् पर्वतसमीपं गतः तत्र धूम् .... पर्वते वह्निरस्ति वा न वेति सन्दिहानः। ततः यत्र यत्र धूमः तत्र तत्र वह्निरिति व्याप्तिं स्मरति। तदनन्तरं तस्य परामर्शज्ञानमुत्पद्यते वह्निव्याप्यधूमवानयम् इति। ततः पर्वतो वह्निमानिति ज्ञानम् उत्पद्यते।

इदम् अनुमितिः। तत्र यत्र यत्र धूमः तत्र तत्र अग्निः इति व्याप्तिज्ञानं करणं, वह्निव्याप्यधूमवानयं पर्वतः इति परामर्शः व्यापारः। पर्वतो वह्निमानिति अनुमितिः कार्यञ्च। अस्याः अनुमितेः प्रयोजनं तु स्वस्यैवेति इदं स्वार्थानुमानम् इत्युच्यते।

# परार्थानुमानम्।

**तर्कसंग्रहः**

**यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान्, यथा महानसं तथा चायं तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽपि अग्निं प्रतिपद्यते।**

**टिप्पणी**

धूमदर्शनेन स्वयम् अग्निमनुमाय यदि अन्यं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तर्हि तत्परार्थानुमानम्। यथा प्रथमं, पर्वतो वह्निमानिति स्वस्य जातं ज्ञानं परं प्रति बोधयति। ततः तत्साधनाय हेतुः प्रयुज्यते धूमवत्वादिति। तदनन्तरं तस्य हेतोः साधकत्वप्रकारप्रदर्शनाय उदाहरणमुच्यते यो यो धूमवान् स स वह्निमान् यथा महानसमिति।

## पञ्चावयवाः

**तर्कसंग्रहः**

**प्रतिज्ञा, हेतु, उदाहरण, उपनय, निगमनानि पञ्चअवयवाः। पर्वतो वह्निमानिति- प्रतिज्ञा। धूमवत्वादिति- हेतुः। यो यो धूमवान् स स वह्निमान् यथा महानसः इति- उदाहरणम्। तथा च अयम् इति-उपनयः। तस्मात् तथा इति- निगमनम्।**

**टिप्पणी**

साध्येन सह पक्षवचनं प्रतिज्ञा। पर्वतो वह्निमानिति। पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः धूमवत्वादिति। साधकत्वप्रकारप्रदर्शनाय व्याप्तिप्रतिपादकं वचनम् उदाहरणं- यो यो धूमवान् स स वह्निमान्, यथा महानसम् इति। हेतोः पक्षधर्मताप्रतिपादकं वचनं उपनयः- तथा चायम् इति। पक्षे साध्यस्य निर्णयपरं वचनं निगमनमिति- तस्मात् तथा इति।

| | |
|---|---|
| प्रतिज्ञा | द्राक्षा मधुरा |
| हेतु | मधुरानुभूतेः |
| उदाहरणम् | यद्यद् मधुरानुभवयुक्ता तत्तद् मधुरवत् यथा कदलीफलम् |
| उपनय | तथा चायम् |
| निगमनाम् | तस्मात् द्राक्षा मधुरवती |

## स्वार्थानुमितिपरार्थानुमित्योः करणम्।

**तर्कसंग्रहः**

**स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्श एव करणम्। तस्मात् लिङ्गपरामर्शोऽनुमानम्।**

**टिप्पणी**

अनुमितिकरणम् अनुमानम् इत्युक्तम्। अनुमितेः करणं लिङ्गपरामर्शः। तस्मात्

लिङ्गपरामर्शः एव अनुमानम्। अत्र व्यापारवत् असाधारणं कारणं करणम् इति न विवक्षा। अपि तु असाधारणं कारणं करणम् इति एव विवक्ष्यते। तस्मात् अनुमितिजनकत्वात् लिङ्गपरामर्शः अनुमानम् इति बोध्यम्।

## लिङ्गं त्रिविधम्।

**तर्कसंग्रहः**

**लिङ्गं त्रिविधम्- अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति।**

**टिप्पणी**

लीनं गमयति इति लिङ्गम्। व्याप्तेः साहाय्येन लीनं वह्न्यादि बोधयति इति धूमः लिङ्गम्। अनुमाने हेतुरेव लिङ्गम् इत्युच्यते। तच्च लिङ्गं व्याप्तिमत् भवति। व्याप्तिः द्विविधा-

१. अन्वयव्याप्तिः- यत्र हेतुः तत्र साध्यम् इति हेतुसाध्ययोः व्याप्तिः। यथा यत्र धूमः तत्र अग्निः इति।

२. व्यतिरेकव्याप्तिः- यत्र साध्यं नास्ति, तत्र हेतुः नास्ति इति साध्याभावहेत्वाभावयोः व्याप्तिः। यथा यत्र वह्न्यभावः तत्र धूमाभावः यथा ह्रदे इति।

एवं व्याप्तिभेदम् अनुसृत्य लिङ्गं त्रिविधम् उच्यते।

१. अन्वयव्यतिरेकिः- अन्वयव्याप्तिमत्, व्यतिरेकव्याप्तिमत् च।
२. केवलान्वयि- अन्वयव्याप्तिमत्, व्यतिरेकव्याप्तिशून्यम्।
३. केवलव्यतिरेकिः- व्यतिरेकव्याप्तिमत्, अन्वयव्याप्तिशून्यम्।

## अन्वयव्यतिरेकि।

**तर्कसंग्रहः**

**अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निः यथा महानसे इति अतिव्याप्तिः। अत्र वहिनर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः।**

### टिप्पणी

यस्य हेतोः अन्वयेन व्यतिरेकेण च व्याप्तिमत्त्वं तदन्वयव्यतिरेकि। अन्वयव्याप्तिमत्वे सति व्यतिरेकव्याप्तिमत्वम् अन्वयव्यतिरेकिणः लक्षणम्। यथा पर्वतो वह्निमान् धूमात् इति। अत्र यत्र यत्र धूमः तत्र तत्र अग्निः यथा महानसे इति अन्वयव्याप्तिः। एवं यत्र वह्न्यभावः तत्र धूमाभावः यथा ह्रदे इति व्यतिरेकव्याप्तिः। तस्मात् अन्वयेन व्यतिरेकेण च व्याप्तिमत्वात् धूमादिति हेतुः अन्वयव्यतिरेकि इत्यर्थः।

## केवलान्वयि।

### तर्कसंग्रहः

**अन्वयमात्र व्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात्पटवत्। तत्र प्रमेयत्व -अभिधेयत्वयोः व्यतिरेकव्याप्तिः नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।**

### टिप्पणी

अभिधेयत्वं नाम अभिधा विषयत्वं , पदशक्ति विषयत्वम् प्रमेयत्वं नाम प्रमा विषयत्वं, यथार्थानुभवविषयत्वम्। अभिधेयत्वं प्रमेयत्वं च सर्वत्र वर्तते इति केवलान्वयि।

यो हेतुः केवलम् अन्वयमात्रव्याप्तिकः व्यतिरेकव्याप्तिरहितः स केवलान्वयी, यथा घटोऽभिधेयः प्रमेयत्वादिति। अत्र यत्र यत्र प्रमेयत्वं तत्र तत्र अभिधेयत्वं यथा पटे इति अन्वयव्याप्तिरस्ति। यत्र यत्र अभिधेयत्वं नास्ति इति व्यतिरेकः न वक्तुं शक्यते। सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। केवलान्वयित्वं नाम अत्यन्ताभावाप्रतियोगित्वम्। अभिधेयत्वस्य अत्यन्ताभावः न कुत्रापि प्रसिद्ध इति तस्य अत्यन्ताभावाप्रतियोगित्वम् इति।

## केवलव्यतिरेकि।

### तर्कसंग्रहः

**व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम्, न चेयं तथा, तस्मान्न तथेति। तत्र यद् गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।**

### टिप्पणी

यो हेतुः (लिङ्गं) केवलं व्यतिरेकव्याप्तिविशिष्टः सः केवलव्यतिरेकि। पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादिति। अत्र पृथिवी पक्षः। पृथिवीतरभेदः साध्यः। गन्धवत्त्वं हेतुः। यत्र पृथिवीतरभेदाभावः तत्र गन्धाभावः यथा जले इति व्यतिरेकव्याप्तिरेव ग्रहीतुं शक्यते। यत्र गन्धवत्त्वं तत्र पृथिवीतरभेदः इति अन्वयव्याप्तौ दृष्टान्तः नास्ति। गन्धवत्त्वं पृथिव्यामेव।

परन्तु पृथिवी अत्र पक्षः। अतः दृष्टान्तत्वेन न गृहीतुं शक्यते। अतः दृष्टान्ताभावात् अन्वयव्याप्तिः नास्ति। (पृथिवीमात्रं- कृत्स्ना पृथिवी इत्यर्थः)

| लिङ्गनाम | उदाहरणम् | अन्वयव्याप्तिः | व्यतिरेकव्याप्तिः |
|---|---|---|---|
| केवलान्वयि | घटोऽभिधेयः प्रमेयत्वात्। | यत्र यत्र प्रमेयत्वं त्तत्र तत्र अभिधेयत्वम् यथा घटः | नास्ति। प्रमेयत्वाभावः अभिधेयत्वाभावः च अप्रसिद्धः। सर्वेषां अभिधेयत्वात् प्रमेयत्वात् च। |
| केवलव्यतिरेकि | पृथिवी इतरेभ्यो भिद्यते गन्धवत्वात् | नास्ति उदाहरणाभावात् पक्षस्य उदाहरणानर्हत्वात्। | यत् इतरेभ्यो न भिद्यते तत् न गन्धवत् यथा जलम्। |
| अन्वयव्यतिरेकि | पर्वतो वह्निमान् धूमात्। | यत्र यत्र धूमः तत्र तत्र वह्निः यथा महानस। | यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभावः यथा ह्रदे। |

## पक्षः।

**तर्कसंग्रहः**

**सन्दिग्धसाध्यवान् पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः।**

**टिप्पणी**

साध्यः यस्मिन्नधिकरणे सन्दिग्धः, तदधिकरणं पक्षः। पर्वते साध्यस्य सन्देहः- पर्वतो वह्निमान् न वा इति। तत्र विशेष्यः पर्वतः पक्षः।

## सपक्षः।

**तर्कसंग्रहः**

**निश्चितसाध्यवान् सपक्षः। यथा तत्रैव महानसम्।**

**टिप्पणी**

सपक्ष इत्यस्यान्वयदृष्टान्त इत्यर्थः। यस्मिन्नधिकरणे साध्यः वह्न्यादिः निश्चितः, तदधिकरणं सपक्षः। यथा महानसः। महानसेऽधिकरणे वह्नेः वृत्तित्वं निश्चयेन बाल्यादेव दृष्टम्। महानसः वह्निमान् इति निश्चयः। तत्र विशेष्यः महानसः सपक्षः।

## विपक्षः।

**तर्कसंग्रहः**

**निश्चितसाध्याभाववान् विपक्षः यथा तत्रैव महाह्रदः।**

**टिप्पणी**

विपक्षः इत्यस्य व्यतिरेकदृष्टान्त इत्यर्थः। यस्मिन्नधिकरणे साध्यः वह्न्यादिः निश्चयेन न विद्यते, तदधिकरणं विपक्षः। यथा जलह्रदः। जलह्रदे वह्नेरभावः निश्चित इति स विपक्षः।


## हेत्वाभासाः।

**तर्कसंग्रहः**

**सव्यभिचार- विरुद्ध- सत्प्रतिपक्षासिद्ध- बाधिताः पञ्च हेत्वाभासः।**

**टिप्पणी**

अनुमाने दुष्टहेतवः हेत्वाभासाः इत्युच्यन्ते। हेतुवत् आभासन्ते इति हेत्वाभासाः, दुष्ट हेतवः इत्यर्थः। दोषाश्च व्यभिचारविरोध- सत्प्रतिपक्ष- असिद्ध- बाधाः। दोषविशिष्टहेतवः दुष्टहेतवः इति। ते ज्ञाताः साक्षाद् वा परम्परया वा अनुमितिप्रतिबन्धकाः ।




## सव्यभिचारः।

**तर्कसंग्रहः**

**सव्यभिचारोऽनैकान्तिकः। स त्रिविधः- साधारणासाधारणानुपसंहारिभेदात्।**

**टिप्पणी**

एकस्मिन्नन्ते भवः ऐकान्तिकः। न ऐकान्तिकः अनैकान्तिकः। हेतुः साध्यस्य साध्याभावस्य च साधारणः भवेत् इति अनैकान्तिकः। सः सव्यभिचारः त्रिविधः- साधारणः, असाधारणः, अनुपसंहारी चेति।

## साधारणः।

**तर्कसंग्रहः**

**तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वात् इति। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् साधारणत्वम्।**

**टिप्पणी**

साध्यभाववद्वृत्तिः इत्यस्य पर्वतो वह्निमान् प्रमेयत्वात् इत्यत्र समन्वयो यथा- साध्यः- वह्निः, साध्याभावः- वह्न्यभावः, तदभाववत्- ह्रदः, तद्वृत्तित्वात् प्रमेयत्वादिति हेतुः साधारणोऽनैकान्तिकः इति। साधारणः अनैकान्तिकः व्याप्तिज्ञानस्य विरोधी भवति।

## असाधारणः।

**तर्कसंग्रहः**

**सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः असाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। (अत्र) शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।**

**टिप्पणी**

सपक्षात् विपक्षाच्च व्यावृत्तः पक्षमात्रवृत्तिर्हेतुः असाधारणः अनैकान्तिकः इति। व्यावृत्तः नाम अवृत्तिः। तथा च सपक्षावृत्तिः विपक्षावृत्तिः पक्षवृत्तिहेतुः असाधारणः। शब्दः नित्यः शब्दत्वात् इत्यत्र शब्दत्वम् इति हेतुः सपक्षे नित्ये आत्मनि न वर्तते इति तस्य सपक्षव्यावृत्तत्वम्। एवं विपक्षे घटे तस्य शब्दत्वस्यावृत्तित्वात् विपक्षावृत्तित्वं च सम्भवति। अत्र शब्दत्वादिति हेतुः पक्षे शब्दे एव वर्तते इति स हेतुः पक्षमात्रवृत्तिः असाधारणोनैकान्तिक इति। अयं च परामर्शविरोधी। अत्र शब्दः पक्षः। नित्यत्ववान् आत्मादिः सपक्षः। नित्यत्वाभाववान् घटादिः विपक्षः।

## अनुपसंहारी

**तर्कसंग्रहः**

**अन्वयव्यतिरेकदृष्टान्तरहितः अनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति।**

**टिप्पणी**

यस्य हेतोः दृष्टान्ताभावात् अन्वयव्याप्तिः, व्यतिरेकव्याप्तिश्च नास्ति स हेतुः अनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादित्यत्र। यत्र यत्र प्रमेयत्वं तत्र तत्र अनित्यत्वम् इति व्याप्तेः दृष्टान्तो न वक्तुं शक्यते, सर्वस्यापि पक्षत्वात्। एवं दृष्टान्तरहितत्वात्प्रमेयत्वादिति हेतुः अनुपसंहारीति। अयं च व्याप्तिज्ञानविरोधी।

## विरुद्धः

**तर्कसंग्रहः**

**साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति। (अत्र) कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम्।**

**टिप्पणी**

यो हेतुः साध्येन न व्याप्तः, साध्याभावेन व्याप्तश्च स विरुद्धः। यथा शब्दो नित्यः कृतकत्वात् इति। अत्र कृतकत्वादिति हेतोः साध्याभावेन अनित्यत्वेनैव व्याप्तिः अस्ति- यत्र यत्र कृतकत्वं तत्र तत्र अनित्यत्वम् इति। कृतकत्वं नाम कार्यत्वम् अथवा जन्यत्वम्।

## सत्प्रतिपक्षः

**तर्कसंग्रहः**

**यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वात् घटवत्।**

**टिप्पणी**

सन् प्रतिपक्षः यस्य सः सत्प्रतिपक्षः। यस्य साध्यसाधकस्य हेतोः साध्याभावसाधकं हेत्वन्तरं विद्यते सः सत्प्रतिपक्षः। यथा शब्दः नित्यः श्रावणत्वात्, शब्दः अनित्यः कार्यत्वात् इति। अत्र नित्यत्वं साध्यम्। साध्याभावः- अनित्यत्वम्। साध्याभावसाधकस्य हेत्वन्तरस्य विद्यमानत्वात् नित्यत्वसाधकहेतुः सत्प्रतिपक्षः।

## असिद्धः

**तर्कसंग्रहः**

**असिद्धः त्रिविधः- आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।**

**टिप्पणी**

न सिद्धः असिद्धः। पक्षः न सिद्धः इति आश्रयासिद्धः। हेतुस्वरूपं पक्षे न सिद्धम् इति स्वरूपासिद्धः। व्याप्तिः न सिद्धा इति व्याप्यत्वासिद्धः।

## आश्रयासिद्धः

**तर्कसंग्रहः**

**आश्रयासिद्धः- यथा गगनारविन्दं सुरभि, अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव।**

### टिप्पणी

हेतोः यः आश्रयः अर्थात्पक्षः, सः न सिद्धः- अप्रसिद्धः इति आश्रयासिद्धः। पक्षे पक्षतावच्छेदकविरहः आश्रयासिद्धः इति। यथा अत्रारविन्दत्वादिति हेतोः आश्रयः गगनारविन्दं केवलकविकल्पितत्वात् नास्त्येव। अतः तस्य हेतोः यः आश्रयः गगनारविन्दं सः असिद्धः। अयं च पक्षधर्मताज्ञानविरोधी।

## स्वरूपासिद्धः

### तर्कसंग्रहः

**स्वरूपासिद्धो यथा शब्दो गुणः चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति। शब्दस्य श्रावणत्वात्।**

### टिप्पणी

पक्षे अवर्तमानः हेतुः स्वरूपासिद्धः। यथा शब्दः गुणः चाक्षुषत्वात् इत्यत्र चाक्षुषत्वं नाम हेतुः शब्दे नास्ति। चाक्षुषत्वं नाम चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वम्। तत् शब्दे नास्ति। शब्दस्य श्रावणत्वात्-श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वात् इति। अयं स्वरूपासिद्धः पक्षधर्मताज्ञानविरोधी।

## व्याप्यत्वासिद्धः

### तर्कसंग्रहः

**सोपाधिको हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः। साध्यसमानाधिकरण अत्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। पर्वतो धूमवान् वह्निमत्वात् इत्यत्र आर्द्रेन्धन संयोगः उपाधिः। यत्र धूमः तत्र आर्देन्धनसंयोग इति साध्यव्यापकता। यत्र वह्निः तत्र आर्देन्धनसंयोगाभावात् इति साधनाव्यापकता। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादोर्द्रेन्धनसंयोगः उपाधिः। सोपाधिकत्वात् वह्निमत्त्वं व्याप्यत्वासिद्धम्।**

### टिप्पणी

उपाधिसहितः हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधि लक्षणम्। यत्र यत्र साध्यं तत्र तत्र उपाधिः इति साध्यव्यापकत्वम्। यत्र यत्र साधनं हेतुः तत्र

तत्र उपाधिः इति न भवति इति साधनाव्यापकत्वम्। यथा पर्वतो धूमवान् वह्नेः इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः। अत्र साध्यं धूमः। साधनं वह्निः। उपाधिः- आर्द्रेन्धनसंयोगित्वम्।

यत्र यत्र धूमः तत्र तत्र आर्देन्धनसंयोगः यथा महानसे इति साध्येन सह (आर्द्रेन्धनसंयोगस्य) व्यापकत्वम्। एवं यत्र वह्निः तत्र आर्द्रेन्धनसंयोगः इति व्याप्तिः नास्ति यथा अयोगोलके इति साधनाव्यापकत्वं च। अतः आर्द्रेन्धनसंयोगः उपाधिः। एवम् उपाधिसहितत्वात् वह्निः इति हेतुः व्याप्यत्वासिद्धः। व्याप्यत्वासिद्धः व्याप्तिज्ञानविरोधी।

## बाधितः

**तर्कसंग्रहः**

**यस्य साध्याभावः प्रमाणान्तरेण निश्चितः सः बाधितः। यथा वह्निरनुष्णो द्रव्यत्वात् इति। अत्र अनुष्णत्वं साध्यं, तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्।**

**टिप्पणी**

साध्याभाववान् पक्षः बाधितः। वह्निः अनुष्णः द्रव्यत्वात् इत्यत्र साध्यं- अनुष्णत्वं प्रमाणान्तरेण प्रत्यक्षप्रमाणेन निश्चितम् इत्यतः द्रव्यत्वादिति हेतुः बाधितः। बाधितः साक्षादनुमितिविरोधी।

अनुमानखण्डः समाप्तः।

# पठनप्रवर्त्तनानि

- अधः प्रदत्ते वाक्ये हेत्वाभासं निरूपयत -

  'हिमखण्डः जलमयः शीतस्पर्शत्वात् यथा तुषारः' ।

- प्रदत्तयोः अनुमानयोः पक्षसाध्यहेतूदाहरणानि विवेचयत

  पर्वतो वह्निमान् धूमात् यथा महानसम्।

  क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्।

- पाठभागस्थम् एकम् अनुमानम् आदाय चर्चाद्वारा

  तस्य पञ्चावयववाक्यानि निरूपयत।

- पाठभागस्थान् स्वार्थ-परार्थानुमानान् वर्गीकुरुत।

# उपमानप्रकरणम्।

## उपमानम्

**तर्कसंग्रहः**

**उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितिः. तत्करणं सादृश्यज्ञानम्। तथाहि कश्चिद्गवयपदार्थम् अजानन् कुतश्चित् अरण्यपुरुषाद् गोसदृशः गवय इति श्रुत्वा वनं गतः वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरं असौ गवयपदवाच्य इति उपमितिः उत्पद्यते।**

**टिप्पणी**

उपमितेः करणम् उपमानम् इत्यर्थः। उपमितिकरणत्वम् उपमानस्य लक्षणम्। संज्ञा संज्ञिसम्बन्धज्ञानत्वम् उपमितेः लक्षणम्। संज्ञा नाम पदं, संज्ञी अर्थः। तत्र उपमानं नाम सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः। उपमितिः फलम्। एकस्मिन् ये धर्माः ते अपरस्मिन् अपि वर्तन्त इति निर्देशः अतिदेशः। यथा गवि ये धर्माः ते गवये अपि सन्ति इति गोसदृशो गवय इति वाक्यं बोधयति (अत्र गोसदृशः गवय इति वाक्यम् अतिदेशवाक्यम्) तत्र गोसदृशपिण्डदर्शनम् उपमानम्। वाक्यार्थस्मरणं व्यापारः। असौ गवयपदवाच्यः इति उपमितिः।

उपमानखण्डः समाप्तः।



## पठनप्रवर्त्तनम्।

- **गोसदृशो गवयः इत्यनेन असौ गवयः इति उपमितिः। परन्तु चन्द्रसदृशं मुखम् - अत्र उपमितिः न । उपमितिलक्षणानुसारं चर्चां कृत्वा विशदयत।**

# अथ शाब्दप्रकरणम्।

## शब्दः

**तर्कसंग्रहः**

**आप्तवाक्यं शब्दः।**

**टिप्पणी**

शब्दप्रमाणम् उच्यते। आप्तवाक्यं च आप्तोच्चरितं वाक्यम्। आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। वाक्यत्वमात्रं यदि लक्षणं तदा उन्मत्तविप्रलम्भकादिभिः उक्तेषु वाक्येषु अतिव्याप्तिः। अतः आप्तोच्चरितम् इति।

## आप्तः

**तर्कसंग्रहः**

**आप्तः तु यथार्थवक्ता।**

**टिप्पणी**

यथार्थवक्तृत्वम् आप्तस्य लक्षणम्।

## वाक्यम्

**तर्कसंग्रहः**

**वाक्यं पदसमूहः। यथा गामानय इति।**

**टिप्पणी**

पदसमूहत्वं वाक्यस्य लक्षणम्। गामानय इत्यत्र प्रकृतिप्रत्ययविभागेन अनेकपदानि सन्ति।

## पदम्

**तर्कसंग्रहः**

**शक्तं पदम्।**

**टिप्पणी**

शक्तं- शक्तिनिरूपकम्। पदस्य अर्थस्य च संबन्धः शक्तिः इत्युच्यते। तस्याः शक्तेः आश्रयः अर्थः, शक्यः। शक्तेः निरूपकं पदं शक्तम् उच्यते।

## शक्तिः

**तर्कसंग्रहः**

**अस्मात् पदात् अयम् अर्थः बोद्धव्यः इति ईश्वरसङ्केतः शक्तिः।**

**टिप्पणी**

ईश्वरः पदार्थान् पदानि च सृष्ट्वा, अस्मात् पदात् अयमर्थः बोद्धव्यः इति सङ्केतयति। सः सङ्केतः एव शक्तिः इत्युच्यते। सङ्केतः- इच्छा। अस्माद्- घटपदात्, अयम् अर्थः, कम्बुग्रीवादिमान् अर्थः, बोद्धव्यः-बोधनीयः इति ईश्वरेच्छा शक्तिः इति अर्थः। नवीननैयायिकाः तु न ईश्वरसङ्केतः शक्तिः किन्तु इच्छा एव इति वदन्ति। अस्मात् पदात् अयम् अर्थः बोद्धव्यः इति इच्छा एव शक्तिरिति तेषामाशयः। (शक्तिरूपपदवृत्तिः निरूपिता। तत्र का लक्षणा इति जिज्ञासा उदेति। लक्षणा च शक्यसम्बन्धरूपा, शक्यसम्बन्धाः सामीप्यसादृशाद्याः। शक्त्या विवक्षितार्थप्रतीतिः यत्र न उत्पद्यते तत्र लक्षणया अर्थान्तरप्रतीतिः दृश्यते। यथा सिंहो माणवकः, गङ्गायां घोषः इत्यादौ। सिंहो माणवकः इत्यत्र माणवके सिंहत्वं न विवक्षितम् परन्तु सिंहसादृश्यं सिंहसदृशो माणवकः इत्यर्थो बुध्यते। एवं गङ्गायां घोषः इत्यत्र गङ्गापदवाच्यः प्रवाहरूपोऽर्थः । तस्य सामीप्यसम्बन्धं तीरे गृहीत्वा गङ्गातीरवर्ती घोषः इत्यर्थः बुध्यते।

## वाक्यार्थज्ञानहेतवः

**तर्कसंग्रहः**

**आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतवः।**

वाक्यार्थज्ञाने हेतवः त्रयः। अत्र हेतुशब्दः सहकारिकारणम् इति अर्थे प्रयुक्तः। हेतुपदोरप्रयुक्तेन एकवचनेन आकाङ्क्षादीनां त्रयाणां वाक्यार्थज्ञाने सम्भूय कारणत्वं न तु पृथक् पृथगिति ज्ञापयति।

## आकाङ्क्षा

**तर्कसंग्रहः**

**पदस्य पदान्तव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा।**

**टिप्पणी**

अन्यत् पदं पदान्तरम्। व्यतिरेकः अभावः। अन्वयः पदानां शब्दबोधजनकः सम्बन्धः। न अनुभावकत्वम् अननुभावकत्वम् अनुभावकत्वम् अनुभव जनकत्वम्। अननुभावकत्वम्- अनुभव- अजनकत्वम्। पदस्य पदान्तराभावप्रयुक्तं शाब्दबोधरूप - सम्बन्धानुभवाजनकत्वम् आकाङ्क्षेति फलितः अर्थः। यथा घटमानय इत्यत्र द्वितीयान्त घटपदस्य आनय इति केनापि पदेन अन्वयः। आकाङ्क्षायाः अभावात्। तथा च न वाक्यार्थबोधः- शब्दबोधः उत्पद्यते। क्रियापदं विना कारकपदं न अन्वयबोधं जनयति इति क्रियापदेन कारकपदस्य आकाङ्क्षा। एवं कारकपदं विना क्रियापदस्य च न आकाङ्क्षा।

## योग्यता

**तर्कसंग्रहः**

**अर्थबाधो योग्यता।**

**टिप्पणी**

अर्थस्य बाधाभावः योग्यता। एकपदार्थे अपरपदार्थवत्त्वं योग्यता। वाह्निना सिञ्चतीति।

## सन्निधिः

**तर्कसंग्रहः**

**पदानामविलम्बेनोच्चारणं सन्निधिः।**

**टिप्पणी**

पदानाम् अविलम्बेन,विना व्यवधानम् उच्चारणं सन्निधिः। आकाङ्क्षायाम् अतिव्याप्तिवारणाय पदानामिति। असहोच्चरितेषु अतिव्याप्तिवारणाय अविलम्बेन इति।

## आकाङ्क्षादिराहित्यस्य उदाहरणम्

**तर्कसंग्रहः**

**तथा चाकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकाङ्क्षाविरहात्। वह्निना सिञ्चतीति न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरे असहोच्चरितानि गाम् आनयेत्यादीनि न प्रमाणम् सान्निध्याभावात्।**

**टिप्पणी**

कारकविभक्त्यन्तपदानां गौरश्वादि पदानाम् अन्वयार्थं क्रियापदानाम् अभावात् गौरश्वः पुरुषो हस्ती इति न प्रमाणम् आकाङ्क्षाभावात्।

योग्यताभावः - सेककरणत्वस्य जलधर्मस्य वह्नौ बाधानिश्चयात् न तादृशवाक्यात् शाब्दबोधः- योग्यतायाः अभावात्।

सान्निध्याभावः- प्रहरः इति कालविशेषः। असहोच्चारितानि विलम्बोच्चारितानि गाम् आनय इत्यादिपदानि न प्रमाणम्। सान्निध्याभावात्।

| वाक्यार्थज्ञानहेतवः | | | |
|---|---|---|---|
| | आकाङ्क्षा। | योग्यता। | सन्निधिः। |
| रहितम् | गौः अश्वः पुरुषः हस्ति। | अग्निना सिञ्चति। | प्रहरे प्रहरे उच्चरितः गाम् आनय इति शब्दः। |
| सहितम् | पुरुषो गच्छति। | जलेन सिञ्चति। | सुकृदुच्चरितं गामानयेति शब्दः। |

## वाक्यम्

**तर्कसंग्रहः**

**वाक्यं द्विविधं वैदिकं लौकिकञ्च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकम् आप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्।**

**टिप्पणी**

वैदिकं- वेदवाक्यं तेन वेदमूलवाक्यानि गृह्यन्ते। लौकिकं तु इत्यस्य वेदवाक्यभिन्नम् इत्यर्थः।

## शाब्दज्ञानम्

**तर्कसंग्रहः**

**वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं तु शब्दः।**

**टिप्पणी**

वाक्यात् यत् अर्थज्ञानं जायते तदेव शाब्दबोधः इत्युच्यते। तस्य करणं शब्दप्रमाणम्।शब्दबोधे पदज्ञानं करणं, वृत्तिज्ञानसहकृतपदज्ञानजन्य- पदार्थोपस्थितिः व्यापारः। वाक्यार्थज्ञानं शाब्दबोधः फलम्। वृत्तिः नाम शक्तिलक्षणान्यतरसम्बन्धरूपा।

शाब्दखण्डः समाप्तः।



## पठनप्रवर्त्तनानि

- **पनसं माषम् पण्डितः चमसः लेखनम् - अत्र कुतो वाक्यार्थज्ञानम् न? चर्चां कृत्वा टिप्पणिम् लिखत**
- **जलेन बध्नाति - अर्थबाधः कथम् ? विशदयत।**

# अथ अवशिष्टगुणनिरूपणप्रकरणम्।

## अयथार्थानुभवभेदाः

**तर्कसंग्रहः**

**अयथार्थानुभवः त्रिविधः- संशयविपर्ययस्तर्कभेदात्।**

**टिप्पणी**

तदभाववति तत्प्रकारकोऽनुभवः अयथार्थ इति पूर्वमुक्तम्। संशयः, विपर्ययः, तर्कः इति भेदात् सः त्रिविधः।

## संशयः

**तर्कसंग्रहः**

**एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वा इति।**

**टिप्पणी**

एकस्मिन् पुरोवर्तिनि पदार्थे, विरुद्धाः व्यधिकरणाः भिन्नाधिकरणवर्तिनः ये नानाधर्माः स्थाणुत्वपुरुषत्वादयः, तेषां वैशिष्ट्यं- संबन्धः, तदवगाहि ज्ञानं स्थाणुत्ववान् पुरुषत्ववान् वा इति ज्ञानम् अनिश्चयात्मकं संशयः इत्यर्थः। सः च व्यधिकरणे समानधर्मादीनां दर्शनेन जायते। घटपटौ इति घटपटोभयावगाहिसमूहाल्बनज्ञानस्य घटत्वपटत्वरूपविरुद्धनानाधर्म वैशिष्ट्यावगाहित्वात् तत्र अतिव्याप्तिवारणाय एकस्मिन् इति। घटः पृथिवी इति ज्ञानस्य एकस्मिन् धर्मिणि घटे भिन्नयोः घटत्वपृथिवीत्वयोः धर्मयोः वैशिष्ट्यावगाहित्वादिति अतिव्याप्तिः। तद्वारणाय विरुद्ध इति। पटे घटत्वविरुद्ध पटत्ववान् अयम् इति ज्ञाने अतिव्याप्तिवारणाय नानेति।

## विपर्ययः

**तर्कसंग्रहः**

**मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ रजतमिति।**

**टिप्पणी**

(विपर्ययः- भ्रमः) यथा रजतत्वाभाववति शुक्तौ रजतत्वप्रकारकम् इदं रजतमिति यद्ज्ञानं तत् विपर्ययः। एवं नित्ये आत्मनि अयम् अनित्य इति ज्ञानमपि विपर्ययः।

## तर्कः

**तर्कसंग्रहः**

**व्याप्यारोपेण व्यापकारोपः तर्कः। यथा यदि वह्निः न स्यात् तर्हि धूमः अपि न स्यादिति।**

**टिप्पणी**

व्याप्यस्य आरोपेण व्यापकस्य आरोपः तर्कः। आरोपः इच्छाजन्यः बाधकालीनभ्रमः। यथा पर्वतो वह्निमान् धूमात् इति अनुमाने धूमोऽस्तु वह्निः मास्तु इति आक्षेपः क्रियते चेत् तन्निवारणाय तर्कः प्रवर्तते। यदि वह्निः न स्यात् तर्हि धूमः अपि न स्यात् इति। अत्र पर्वते वह्निः धूमः च वर्तेते एव इति ज्ञात्वा एव तत्साधनाय तर्कं प्रयुङ्क्ते।

अत्र तर्के व्याप्यः वह्न्यभावः। व्यापकः धूमाभावः। व्याप्यस्य आरोपेण व्यापकस्य आरोपः यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात् इति। वह्निः धूमं प्रति कारणम् इत्यतः कार्यकारणभावः अत्र अनुकूलः। पर्वते धूमसत्त्वात् वह्निः अस्त्येव इति अनेन फलति।

## स्मृतिः

**तर्कसंग्रहः**

**स्मृतिरपि द्विधा- यथार्था अयथार्था च। प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था।**

**टिप्पणी**

अनुभवः द्विविधः इत्युक्तम्। तद्वत् स्मृतिरपि इति सूचयति अपि शब्देन। प्रमाजन्या यथार्थानुभवजन्या या भावना तया जन्या स्मृतिः यथार्था इत्यर्थः। एवम् अप्रमाजन्या- अयथार्थानुभवजन्या या भावना तया जन्या स्मृतिः अयथार्था इत्यर्थः।

## सुखम्

**तर्कसंग्रहः**

**अनुकूलवेदनीयम् सुखम्**

**सर्वेषामनुकूलतया वेदनीयं सुखम्।**

**टिप्पणी**

सर्वेषां सर्वशरीरिणाम् अनुकूलमिति वेद्यं यत् तत् सुखम् इत्यर्थः। शत्रुदुःखे अतिव्याप्तिवारणाय सर्वेषामिति। तत्र इतरेच्छानधीनेच्छाविषयत्वमिति सुखलक्षणं निष्कर्षणीयम् इति विज्ञाः। यतः घटो अनुकूल इति आकारकज्ञानदशायाम् अनुकूलत्वप्रकारकज्ञानविशेष्यत्वस्यघटादावपि सत्वात् घटे अतिव्याप्तिः। सुखेच्छाधीने भोजनादौ अतिव्याप्तिवारणाय इतरेच्छा नधीनेति इच्छा विशेषणम्। अहं सुखी इति अनुभवसिद्धसुखत्वजातिमत्सुखम् इति लक्षणं पर्यवसितम्।

## दुःखम्

**तर्कसंग्रहः**

**प्रतिकूलवेदनीयम् दुःखम्**

**प्रतिकूलतयावेदनीयं दुःखम्।**

**टिप्पणी**

सर्वेषाम् इति अनुबध्यते। सर्वात्मना प्रतिकूलम् इति वेद्यं यत् तद् दुःखम् इति अर्थः। शत्रुसुखवारणाय सर्वेषामिति।

## इच्छा

**तर्कसंग्रहः**

**इच्छा कामः।**

**टिप्पणी**

इच्छाकामौ पर्यायौ। इच्छात्वजातिमती इच्छा इति लक्षणम्। इच्छा च द्विविधा फलेच्छा उपायेच्छा च। तत्र फलं सुखादिकम्। उपायः यागादिः।

## द्वेषः

**तर्कसंग्रहः**

**क्रोधो द्वेषः।**

**टिप्पणी**

द्वेषक्रोधौ पर्यायौ। क्रोधत्वं लक्षणम्। द्वेष्टि इति अनुभवसिद्धद्वेषत्वजातिमान् द्वेषः।

## प्रयत्नः

**तर्कसंग्रहः**

**कृतिः प्रयत्नः।**

**टिप्पणी**

कृतिप्रयत्नौ पर्यायौ। प्रयत्नत्वजातिमान् प्रयत्नः।

स त्रिविधः- १. प्रवृत्तिकारणम् २. निवृत्तिकारणम्
३. जीवनयोनिः

इच्छाजन्यः प्रयत्नः प्रवृत्तिकारणम्। द्वेषजन्यः प्रयत्नः निवृत्तिकारणम्। जीवनादृष्टजन्यो प्रयत्नः जीवनयोनिः। सः च प्राणसञ्चारकारणम्।

## धर्मः

**तर्कसंग्रहः**

**विहितकर्मजन्यो धर्मः।**

**टिप्पणी**

विहितः वेदविहितः। वेदविहितकर्मजन्यत्वं धर्मस्य लक्षणम्। वेदविहितक्रियायाम् अतिव्याप्तिवारणाय कर्मजन्य इति। अधर्मे अतिव्याप्तिवारणाय वेदविहित इति। एषः धर्मः पुण्यम् अदृष्टम् इत्युच्यते।

## अधर्मः

**तर्कसंग्रहः**

**निषिद्धकर्मजन्यः अधर्मः।**

**टिप्पणी**

निषिद्धः वेदनिषिद्धः। वेदनिषिद्धकर्मजन्यत्वम् अधर्मस्य लक्षणम्। वेदनिषिद्ध क्रियायाम् अतिव्याप्तिवारणाय कर्मजन्य इति। धर्मे अतिव्याप्तिवारणाय वेदनिषिद्ध इति। स च भोगप्रायश्चित्तादिना नश्यति। सः पापम् इत्युच्यते।

## आत्मविशेषगुणाः

**तर्कसंग्रहः**

**बुद्ध्यादयः अष्टौ आत्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्नाः नित्याः अनित्याः च। नित्या ईश्वरस्य। अनित्या जीवस्य।**

**टिप्पणी**

बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः च आत्ममात्र विशेषगुणाः। एते गुणाः आत्मनि वर्तन्ते। न इतरेषु द्रव्येषु इति बोधयितुं मात्रपदम्। बुद्धीच्छाप्रयत्नानां विशेष उच्यते। ते नित्याः अनित्याः च इति विशेषः। परमात्मनि बुद्धीच्छाप्रयत्नाः नित्याः। जीवात्मनिष्ठाः बुद्धीच्छाप्रयत्नाः अनित्याः तेषां जन्यत्वात्।

## संस्कारः

**तर्कसंग्रहः**

**संस्कारः त्रिविधः-**

**वेगः**

**भावना**

**स्थितिस्थापकः च इति।**

## वेगः

### तर्कसंग्रहः

**वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः।**

### टिप्पणी

आद्यपतनासाधारणकारणम् गुरुत्वम्। द्वितीयादिपतनासमवायिकारणं वेगः। स च क्रियाजन्यः। स च पृथिव्यादिचतुष्टये मनसि च वर्तते।

## भावना

### तर्कसंग्रहः

**अनुभवजन्या स्मृतिहेतुः भावना। आत्ममात्रवृत्तिः।**

### टिप्पणी

अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनायाः लक्षणम्। तत्र अनुभवजन्यत्वे सति इति विशेषणानुपादाने आत्ममनःसंयोगे अतिव्याप्तिः। आत्ममनःसंयोगस्य ज्ञानं प्रति असमवायिकारणत्वेन स्मृतिं प्रत्यपि कारणत्वात्। स्मृतिहेतुत्वमिति पदस्याभावे अनुभवध्वंसेऽतिव्याप्तिः। अनुभवध्वंसस्यानुभवजन्यत्वात्। भावना आत्मनि वर्तते, न इतरेषु द्रव्येषु। यतः अनुभवः आत्मनि जायते, तज्जन्या भावना अपि आत्मनि एव। अतः आत्ममात्रवृत्तिरित्यत्र मात्रपदम्।

## स्थितिस्थापकः

### तर्कसंग्रहः

**अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादि पृथिवीवृत्तिः।**

### टिप्पणी

कटादीनि, पूर्वावस्थातः अन्यथा कृतानि अपि पुनः पूर्वावस्थामेव भजन्ते। तत्र कारणं कश्चन संस्कारः। स एव स्थितिस्थापकः। सः कटादिमात्रवृत्तिः। अन्यत्र नास्ति।

इति गुणाः।

# अथ अवशिष्टपदार्थनिरूपणप्रकरणम्

## कर्म

**चलनात्मकं कर्म।**

**१. ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्।**

**२. अधोदेशसंयोगहेतुरपक्षेपणम्।**

**३. शरीरसन्निकृष्टसंयोगहेतुः आकुञ्चनम्।**

**४. विप्रकृष्टसंयोगहेतुः प्रसारणम्।**

**५. अन्यत्सर्वं गमनम्।**

| | |
|---|---|
| उत्क्षेपणम्। | विमानस्योद्गमनम् |
| अपक्षेपणम्। | पर्णपतनम् |
| आकुञ्चनम्। | कान्तसूच्या अयोरेणूनाम् आकर्षणम् |
| प्रसारणम्। | सूर्यरश्मीनां व्यापनम् |
| गमनम्। | वाहनस्य चलनम् |

चलनम् आत्मा स्वरूपं यस्य तत् चलनात्मकम्। चलनं क्रिया। क्रियाजन्यः संयोगः। संयोगे सा असमवायिकारणम्। तथा च संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं कर्मणः लक्षणम् इति सिद्ध्यति। हस्तपुस्तकसंयोगे अतिव्याप्तिवारणाय सत्यन्तम्। घटादौ अतिव्याप्तिकरणाय विशेष्यदलम्। उद्देशप्रकरणे कर्मभेदः प्रदर्शित इति तेषां लक्षणानि यथाकामं प्रतिपाद्यन्ते।

१. ऊर्ध्वदेशसंयोगहेतुत्वम् उत्क्षेपणस्य लक्षणम्। अपक्षेपणादिषु अतिव्याप्तिवारणाय ऊर्ध्वेति।

२. अधोदेशसंयोगहेतुत्वम् अपक्षेपणस्य लक्षणम्। उत्क्षेपणादिषु अतिव्याप्तिवारणाय अध इति।

३. सन्निकृष्टसंयोगहेतुत्वमाकुञ्चनस्य लक्षणम्। प्रसारणादिषु अतिव्याप्तिवारणाय सन्निकृष्टेति।

४. विप्रकृष्टसंयोगहेतुत्वं प्रसारणस्य लक्षणम्। आकुञ्चनादिषु अतिव्याप्तिवारणाय विप्रकृष्टेति।

५. उत्क्षेपणादिभिन्नत्वे सति संयोगासाधारणहेतुत्वं गमनस्य लक्षणम्। भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनादयः गमने अन्तर्भवन्ति। अतः तेषां पृथग्विभागः न कृतः।

## सामान्यं

**तर्कसंग्रहः**

**नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। परं सत्ता। अपरं द्रव्यत्वादि।**

**टिप्पणी**

सामान्यम् इति समानधर्मः। अयं घटः अयं घटः इति बहुत्र समानप्रतीतिः जायते। तेन तेषु घटत्वं सामान्यम्। द्रव्यं सत्, गुणः सन्, कर्म सदिति द्रव्यगुणकर्मसु सत् सदिति प्रतीतिविषयः सत्तारूपं सामान्यम्। नित्यत्वे सति अनेकानुगतत्वं सामान्यस्य लक्षणम्। अनुगतत्वञ्च समवायेन इति बोद्ध्यम्। संयोगे अतिव्याप्तिवारणाय नित्यम् इति। कालादौ अतिव्याप्तिवारणाय अनेकेति। अनेकानुगतत्वं समवायेनेति न अत्यन्ताभावे अतिव्याप्तिः। सामान्यादिचतुष्टये सामान्यं नास्ति। तदेव उच्यते द्रव्यगुणकर्मवृत्ति इति अनेन। यत् च अधिकदेशवृत्ति तत् परसामान्यं, यत् च अल्पदेशवृत्ति तत् अपरसामान्यम्। इतरसामान्यापेक्षया परं द्रव्यगुणकर्मवृत्ति सत्ता इति उच्यते। द्रव्यगुणकर्मवृत्ति सामान्यं सत्ता इत्यर्थः। सत्तापेक्षया द्रव्यमात्रवृत्तिद्रव्यत्वम् अपरम् इत्यर्थः।

## विशेषः

**तर्कसंग्रहः**

**नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषाः।**

**टिप्पणी**

पृथिव्यादिचतुष्टयपरमाणवः आकाशादिपञ्चकं च नित्यद्रव्याणि। तत्र वर्तमानाः विशेषाः। व्यावर्तकाः- भेदज्ञापकाः। परमाण्वादीनां परस्परं भेदज्ञापनाय विशेषः उपयुज्यते। विशेषेषु परस्परं भेदज्ञानाय अन्यत् नापेक्ष्यते। विशेषा एव स्वयं व्यावर्तकः। स्वयं स्वस्य भेदज्ञापकाः इति।

## समवायः

**तर्कसंग्रहः**

**नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितम् एव अवतिष्ठते तौ अयुतसिद्धौ। यथा अवयव अवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति।**

**टिप्पणी**

अयुतसिद्धाः पञ्च।

१. अवयव- अवयविनौ। यथा कपालः घटश्च।

२. गुणगुणिनौ। यथा गन्धः पृथिवी च।

३. क्रियाक्रियावन्तौ। यथा चलनं वायुः च।

४. जातिव्यक्ती। यथा घटत्वं घटः च।

५. विशेषनित्यद्रव्ये। यथा विशेषः परमाणुः च।

एतेषां परस्परं सम्बन्धः समवायः इत्यर्थः। विशिष्टप्रतीतिजनकः सम्बन्धः। यु मिश्रणामिश्रणयोः इति धातोः क्तप्रत्यये युतमिति। प्रकृते अमिश्रितमित्यर्थः। न युतमयुतम्। नञ् द्वयोपादानात् मिश्रितौ एव सिद्धौ इत्यर्थः। ययोः द्वयोः मध्ये एकं, अविनश्यदवस्थं विनाशपर्यन्तम्, अपराश्रितम् एव अवतिष्ठते अतः तौ अयुतसिद्धौ। यथा कपालौ घटश्च। कपालघटयोः मिश्रितयोरेव स्थितिः। कपालः घटावयवः। घटः कपालसंयोगजन्योऽवयवी। तत्र विनाशपर्यन्तं घटः कपालम् आश्रित्यैव वर्तते। कपालयोः विनाशे न घटः। तौ अयुतसिद्धौ। तयोः संबन्धः समवायः। एवं गन्धः पृथिवी च इत्यादि।

## प्रागभावः

**तर्कसंग्रहः**

**अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य।**

**टिप्पणी**

घटः उत्पद्यते। घटस्य उत्पत्तेः पूर्वं घटो नास्ति इति या बुद्धिः सा घटप्रागभावबुद्धिः

इति उच्यते। सः घटप्रागभावः अनादिकालात् अस्ति। घटस्य उत्पत्तौ सः नश्यति। अतः अनादिः- आदिरहितः, सान्तः- नाशवान् प्रागभावः। घटादिषु अतिव्याप्तिवारणाय अनादिरिति। परमाणुषु अतिव्याप्तिवारणाय सान्त इति।

## प्रध्वंसाभावः

**तर्कसंग्रहः**

**सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य।**

**टिप्पणी**

यः अभावः कार्यस्य नाशरूपः उत्पद्यते सः च अनन्तः सोऽयं प्रध्वंसः। अनन्तः नाम नाशरहितः। कार्यस्य घटस्य उत्पत्यनन्तरं घटविनाशः एव ध्वंसः। घटादिषु अतिव्याप्तिवारणाय अनन्त इति। आत्मादौ अतिव्याप्तिवारणाय सादिरिति।

## अत्यन्ताभावः

**तर्कसंग्रहः**

**त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकाभावः। यथा भूतले घटो नास्ति इति।**

**टिप्पणी**

त्रैकालिकत्वे सति संसर्गविशिष्टप्रतियोगिताकोऽत्यन्ताभावः। ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिकेति। भूतले घटः नास्ति इति प्रतीतिविषयः घटाभावः अत्यन्ताभावः।

## अन्योन्याभावः

**तर्कसंग्रहः**

**तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो नेति।**

**टिप्पणी**

तादात्म्यञ्च तद्वृत्तिविशेषधर्मः। स्वस्मिन् स्वस्य संबन्धः तादात्म्यसम्बन्धः इत्युच्यते। घटे घटः तादात्म्येन अस्ति। घटः पटो न इत्यत्र घटे पटस्य तादात्म्यं नास्ति। तादात्म्येन अभावः एव वर्तते। स एव अन्योन्याभावः। सः भेदः इत्यपि उच्यते।

**तर्कसंग्रहः**

**सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावत्सप्तैव पदार्था इति सिद्धम्।**

**टिप्पणी**

लोके ये केचन पदार्थाः प्रतीयन्ते, शास्त्रे च ये उच्यते सर्वेऽपि सप्तसु पदार्थेषु एव अन्तर्भवन्ति। अतः पदार्थाः सप्तैव इति।

## उपसंहारः

**कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।**
**अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः।।**

कणादमतं वैशेषिकम्। न्यायमतं गौतमीयम्। तयोः मतयोः बालानां व्युत्पत्तिसिद्ध्यर्थं पण्डितेन अन्नम्भट्टेन तर्कसंग्रहः नाम अयं ग्रन्थः रचितः।



# पठनप्रवर्तनानि

**यथोचितं योजयत-**

| | |
|---|---|
| स्थाणुर्वा पुरुषो वा | यथार्थानुभवः |
| शुक्तौ रजतज्ञानम् | तर्कः |
| यदि वह्निः न स्यात् तर्हि धूमोऽपि न स्यात्। | विपर्ययः |
| धटमहं जानामि | संशयः |

अधः प्रदत्तेषु वाक्येषु के के गुणाः इति चर्चां कृत्वा सलक्षणं विशदयत।

सुखनिद्रा अनुभूता।

नष्टा मे रत्नमालिका।

विद्यामभिलषामि

अपसर अपसर रे मूढबुद्धे !

दर्शपूर्णमासाभ्यां स्वर्गप्राप्तिः।

श्येनयागेन नरकावाप्तिः।

अभावभेदान् विवेचयत-

०२.०४.१९७४ एकस्य पुरुषस्य जन्मदिनम्। तत्पूर्वं तस्य अभावः।

३०.०१.१९४८ गान्धिमहाभागस्य वधम्। तत्पश्चात् तस्याभावः।

शशशृङ्गः - तस्य अभावः।

इन्दरनीले न रागोऽस्ति पद्मरागे न नीलिमा। अत्रस्थः अभावः.

# पठनाधिगमः

- दर्शनानां विशिष्य न्यायवैशेषिकशास्त्रयोः परिचयं प्रस्तौति। उपन्यासं लिखति च।
- सप्तपदार्थ प्रभेदान् कथयति। नवद्रव्याणां नाम कथयति। चतुर्विंशति गुणानां नाम कथयति। पञ्चकर्मणां नाम कथयति। चतुर्विधाभावान् नाम्ना लिखति।
- द्रव्याणां लक्षणानि, प्रभेदान् च कथयति। भूतद्रव्याणि, मूर्तद्रव्याणि, विभुद्रव्याणि च विविच्य वदति लिखति च। पञ्चप्राणान् स्थानभेदेन विविच्य वदति। इन्द्रियाणां स्थानानि विषयान् च विवेचयति।
- तपप्रभृति..... बुद्धिपर्यन्त गुणलक्षणानि विवेचयति लिखति च।
- प्रमा नाम का? प्रमाणं किम्? कतिविधम् इति विविच्य वदति। लिखति च।
- कारणत्रयं प्रत्यभिजानाति।
- प्रत्यक्षप्रमाणं निरूप्य लिखति। इन्द्रियार्थसन्निकर्षः सभेदम् उच्यते।
- अनुमानप्रमाणं तद्भेदान् च सप्रमाणं वदति, लिखति च।
- पञ्चावयववाक्ययुक्तम् अनुमानवाक्यं सप्रपञ्चं निरूप्य लिखति।
- हेत्वाभासविभागान् वदति, लक्षणम् उदाहरणञ्च कथयति। उदाहरणेषु दोषान् प्रदर्शयति।
- उपमानप्रमाणं शब्दप्रमाणञ्च निरूपयति। वाक्यार्थज्ञानहेतूनां ज्ञानं संपादयति प्रयुङ्क्ते च। प्रश्नोत्तरक्रीडां चालयति।
- गुणान्, कर्मादिपदार्थान् च सलक्षणं वदति। अभावभेदान् विस्तरेण वदति, लिखति च।

# प्रश्नोत्तराणि

**I.** कोष्ठात् समुचितमुत्तरमादाय लिखत।

1. कति पदार्थाः ?

   ( पञ्च, सप्त, नव)

2. द्रव्याणि कति ?

   (दश, नव, सप्त)

3. गुणाः कति ?

   (पञ्चविंशतिः, चतुर्विंशतिः, सप्त)

4. कियन्ति कर्माणि ?

   (सप्त, पञ्च, त्रीणि)

5. सामान्यं कतिविधम् ?

   (त्रिविधं, द्विविधं, असंख्यम्)

6. कियन्तः विशेषाः ?

   (अनन्ताः, पञ्च, सप्त)

7. नित्यसंबन्धः कः ?

   (समवायः संयोगः, विभागः)

8. भ्रमणस्य कुत्रान्तर्भावः ?

   (उत्क्षेपणे, गमने, ऊर्ध्वज्वलने)

9. अभावः कतिविधः ?

   (बहुविधः, चतुर्विधः त्रिविधः)

10. न्यायमते कतिविधानि प्रमाणानि?

(चत्वारि, त्रीणि, नवानि)

11. शीतस्पर्शवत्यः –।

(पृथिवी, आपः, भावना)

12. रसग्राहकमिन्द्रियं कुत्र वर्तते?

(नासाग्रे, श्रोत्रे, जिह्वाग्रे)

13. रूपग्राहकमिन्द्रियं किम्?

(त्वक्, चक्षुः, मनः)

14. आकाशस्य विशेषगुणः कः?

(रूपम्, शब्दः, स्पर्शः)

15. ज्ञानाधिकरणं –।

(इन्द्रियं, आत्मा, बुद्धिः)

16. रसः कतिविधः?
(षड्विधः, चतुर्विधः, त्रिविधः)

17. गन्धः कतिविधः?

(त्रिविधः, द्विविधः, निर्विभागः)

18. अनुष्णाशीतस्पर्शः कुत्र वर्तते?

(पृथिवीतेजसोः, पृथिवीवाय्वोः, पृथिवीजलयोः)

19. परिमाणं कतिविधम्?

(त्रिविधम्, पञ्चविधम्, चतुर्विधम्)

20. शब्दः कुत्र वर्तते?

(वायौ, आकाशे, गुणे)

21. अनुभवः कतिविधः ?

(त्रिविधः, चतुर्विधः, द्विविधः)

22. यथार्थानुभवः कतिविधः ?

(त्रिविधः, द्विविधः, चतुर्विधः)

23. कारणं कतिविधम् ?

(द्विविधं, त्रिविधं, एकविधम्)

24. इन्द्रियार्थसन्निकर्षः कतिविधः ?

(षड्विधः, चतुर्विधः, त्रिविधः)

25. घटरूपप्रत्यक्षे कः सन्निकर्षः ?

(समवायः, संयोगः, संयुक्तसमवायः)

26. अभावप्रत्यक्षे सन्निकर्षः कः ?

(समवायः, विशेषणविशेष्यभावः, संयोगः)

27. परामर्शजन्यं ज्ञानं —।

(स्मृतिः, अनुमितिः, शब्दः)

28. 'घटोऽभिधेयः प्रमेयत्वात्' इत्यत्र कीदृशं लिङ्गम् ?

(केवलान्वयि, अन्वयव्यतिरेकि, केवलव्यतिरेकि)

29. निश्चित साध्यवान् —।

(पक्षः, सपक्षः, विपक्षः)

30. 'शब्दो नित्यः शब्दत्वात्' अत्र हेतौ कः दोषः ?

(असाधारणः, सव्यभिचारः, पक्षः)

31. 'शब्दो नित्यः कृतकत्वात्' इत्यत्र कः साध्यः?

(कृतकत्वं, नित्यत्वं, शब्दत्वम्)

32. संज्ञासंज्ञिसम्बन्धज्ञानं —।

(अनुमितिः, उपमितिः, शाब्दः)

33. किं नाम वाक्यम्?

(पदसमूहः, वर्णसमूहः, शब्दसमुदायः)

II. अधोनिर्दिष्टेषु लक्षणं निरूपयत।

1. पदार्थः।
2. तेजः।
3. गुणः।
4. द्रव्यम्।
5. गन्धः।
6. मनः।
7. स्नेहः।
8. स्मृतिः।
9. करणम्।
10. कारणम्।
11. व्याप्तिः।
12. यथार्थानुभवः।
13. प्रत्यक्षम्।
14. उपमितिः।
15. शब्दः।
16. दिक्।
17. संख्या।

III. अधोनिर्दिष्टेषु विभागान् निर्दिशत।

1. पदार्थः।
2. रूपभेदाः।
3. प्रमाणानि।
4. सामान्यम्।
5. इन्द्रियार्थसन्निकर्षः।
6. आत्मा।
7. ज्ञानम्।
8. कारणम्।

9. अनुमितिः।
10. हेत्वाभासः।
11. स्मृतिः।
12. अयथार्थानुभवः।
13. संस्कारः।
14. कर्म।
15. अभावः।

IV. अधोनिर्दिष्टान् विशदयत।

1. पदार्थः।
2. नित्यद्रव्याणि ।
3. ज्ञानसामान्यकारणानि।
4. शरीरम्।
5. अयथार्थानुभवः।
6. सविकल्पकप्रत्यक्षम्।
7. पाकः।
8. परिमाणम्।
9. श्रवणम्।
10. उपमितिः।
11. स्मृतिः।
12. करणम्।
13. अनुबन्धचतुष्टयम्।
14. प्राणः।
15. द्वित्वादीनामुत्पत्तिः।
16. प्रमा।
17. अप्रमा।
18. व्याप्तिः।
19. अयुतसिद्धौ।
20. आत्मविशेषगुणाः।

V. एकैकया खणिडिकया विवृणुत।

1. लक्षणदोषाः।
2. यथार्थानुभवकरणानि।
3. कारणभेदाः।
4. प्रत्यक्षज्ञानहेतवः।
5. परार्थानुमानम्।
6. लिङ्गत्रैविध्यम्।
7. हेत्वाभासाः।
8. वाक्यार्थज्ञानहेतुः।

१. अधोनिर्दिष्टाः केषु पदार्थेषु अन्तर्भवति इति पट्टिकां कुरुत।

जलम्, पाषाणखण्डः, सुवर्णम्, वह्निः, प्राणः, अपानः, प्राचि, जीवात्मा, ईश्वरः, मनः, दारुः।

२. उत्तराणि लिखत।

क. तर्कसंग्रहस्य कर्ता कः ?

ख. न्यायदर्शनस्य उपज्ञाता कः?

ग. नास्तिकदर्शनस्य एकम् उदाहरणं लिखत।

घ. वाक्यलक्षणं किम्?

३. अधोलिखितेषु कः गणे न अन्तर्भवति।

क. प्रत्यक्षम्, कारणम्, अनुमानम्, शब्दम्।

ख. रूपम्, संख्या, धर्मम्, कालः।

ग. हेतु, उदाहरणम्, व्यतिरेकी, उपनयम्।

घ. आपः, तेजः, आकाशम्, कर्म।

ङ. आकुञ्चनम्, प्राभावः, प्रध्वंसाभावः।

४. यथोचितं योजयत।

| | | |
|---|---|---|
| च. सुखाद्युपलब्धिसाधनम् | गुणः | करणम् |
| छ. रसनाग्राह्यः | इन्द्रियम् | रसः |
| ज. स्मृतिः | संस्कारमात्रजन्यम् | मनः |
| झ. असाधारणम् | आकांक्षा | |

ज्ञानम्

ञ. वाक्यार्थज्ञानहेतवः कारणम् योग्यता, सन्निधिः

५. लघुटिप्पणीं लिखत।

क. तेजः ख. वायुः

६. व्याप्तिं लिखत।

क. पर्वतो वह्निमान् धूमवत्वात्।

ख. आकाशं मेघवत् गर्जनात्।

७. लक्षणं लिखत।

क. पृथ्वी, ख. कालम् ग. परामर्शः

८. अधोनिर्देष्टेषु विभुद्रव्यं विवेचयत।

आकाशम्, जलम्, पृथ्वी

९. कस्य लक्षणम् इदम्।

क. चक्षुर्मात्रग्राह्यो गुणः।

ख. अतीतादि व्यवहारहेतुः।

१०. लक्षणवाक्यम् शुद्धीकृत्य लिखत।

क. अनुमितिकरणम् उपमानम्।

ख. शीतस्पर्शवत् जलम्।

ग. अर्थाबाधः सन्निधिः।

११. केरलात् कर्णाटकापेक्षया दिल्ली बहुदूरे वर्तते। अत्र दिक्कृतम् अपरत्वं कुत्र? दिक्कृतपरत्वं कुत्र?

१२. घटः न उत्पादितः, घटो नष्टः, घटो न पटः। अत्र के के अभावाः?

१३. अनुमानं कतिविधं के च ते?

१४. पर्वतो वह्निमान् परार्थानुमानेन समर्थयत।

१५. शिलातलं जलसम्बन्धी शीतत्वात् पञ्चावयववाक्येन समर्थयत।

१६. फलस्य पतनं, उपग्रहविक्षेपणं, नद्याः स्यन्दनं, अत्रत्य कर्मभेदान् विवेचयत।

१७. अधः प्रदत्तेषु वाक्येषु कः हेत्वाभासः इति लिखत।

क. पर्वतो वह्निमान् प्रमेयत्वात्।

ख. सर्वम् अनित्यं प्रमेयत्वात्।

ग. शब्दो गुणः चाक्षुषत्वात्।

घ. वह्निरनुष्णो द्रव्यत्वात्।